K.N. Sharma

VARIVASYÂ RAHASYA

WITH A COMMENTARY BY

BHÂSKARARÂYA.

V. NAGAM AIYA,
3 JUN. 1901
DEWAN PEISHCAR.

EDITED BY

R. ANANTA KRISHNA ŚÂSTRI

OF ADYAR LIBRARY.

BOMBAY:

NTED AT THE "TATVA-VIVECHAKA" PRESS.

1901.

PREFACE.

The following work entitled the Varivasyâ Rahasya or "the Secret of worship" deals with the theoretical and practical sides of that Spiritual Science by which the individual Self is enabled to respond in every way to the Universal Love, Harmony and Beauty, which are the inherent qualities of the central Illumination otherwise known as the Supreme Self. Manu, Chandra, Kubera, Lopâmudrâ, Manmatha, Agastya, Nandikes'vara Sûrya, Vishnu, Shanmukha, S'iva and Durvâsas are said to be the masters of the Science of S'rîvidyâ. From them it has been handed down to us through the Secret Indian Brotherhoods in an unbroken line of teachers and disciples. The sage Agastya and his consort Lopâmudrâ stand foremost as its devotees. Bhâskararâya or Bhâsurânandanâtha, its latest exponent, is the author of this short treatise which is composed of two chapters consisting of about 1,200 granthas including the text and commentary. We find it stated in 'Dîkshâvidhi' "that he came down from Benares and was living in the countries watered by the Kâverî and that there was no part of the globe left unseen by him; no king of his time not devoted to him, and no science unknown to him. In fact his very form was that Central Illumination, that Supreme Energy which has manifested itself as Universal Love, Harmony and Beauty."

Particulars regarding his parentage, the time in which he flourished, and the names of the works written by him

can be gathered from the introduction to the English translation of "Lalitâsahasranâma with Bhâskararâya's commentary."

This however is the first work written by the said author on the philosophy of the most sacred Mantra known as S'rîvidyâ. Even a cursory reading of the work will leave on the mind of the reader an impression of its sublimity and all-embracing philosophy. It is highly desirable that this subtle philosophy should be rendered into English for the benefit of those who do not know Sanskrit and who always seek after spiritual truths. But this cannot be done at once, and the work of translation must be deferred until I publish the text of that colossal work called "Setubandha" of Bhâskararâya, as without it the student will not clearly understand the teachings embodied in this work.

The present edition is based upon two copies of manuscripts. The first belongs to H. H. Kerala Varma C. S. I. who was kind enough to make a loan of it to me. It is in a very excellent condition and is free from mistakes, having been carefully revised by himself, a great authority on this subject.

The other was loaned to me from the Government Oriental Library of Mysore by its Curator, Mr. A. Mahadeva Sastry, B. A. who had obtained it from Mr. G. Krishna Sastry, the Editor of "Arya Siddhânta Chandrikâ" and

"Bhâratî" Series of Sanskrit-Malayalam publications. The latter belongs to a family which has preserved to this day its hereditary knowledge on this subject in its prestine purity. Furthermore, this manuscript gives two readings and is free from errors.

Had it not been for the generous pecuniary help I have received from Mr. C. R. Pattabhirama Iyer, Judge, City Court, Madras, I should not have ventured on this publication. My special thanks, therefore, are due to him, and also to Mr. G. Krishna Sastry for his having revised the press manuscript.

R. ANANTA KRISHNA S'ÂSTRI.

ADYAR,
25th *March*, 1901.

वरिवस्यारहस्ये

सव्याख्याने प्रथमोंशः ।

॥ श्रीरस्तु ॥ गुरुभ्योनमः ॥

त्रिद्यानाञ्च मनूनां मनुसंख्यानाञ्च विद्यानां ।
उपदेष्टा जयतितरां नरनृसिंहानन्दनाथगुरुः ॥
वरिवस्या रहस्याख्यो ग्रन्थो यस्ते(स्वे)न निर्मितः ।
तत्र दुर्घटशब्दानामर्थस्संक्षिप्य कथ्यते ॥

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" (मु० उ० २-१२) "आचार्यवान्पुरुषो वेद" (छा० उ० ६-१४-२) इत्यादि श्रुत्या गुरूपसदनस्य तत्त्वज्ञानजनकत्वात् प्रथमं सकलमन्त्राऽधिष्ठानदेवतापररूपं श्लेषेण तद्दैवतन्नरसिंहञ्च विघ्नविघाताय स्तुवन्संप्रदायन्तदाज्ञयैव प्रवर्तयति ॥

प्रह्लादाभीष्टदाने विबुधसमुदयस्तूयमानापदाने
शेषक्षोणीभृदन्तःप्रविलसितपदाहोबलक्षेत्रग-
र्भात् । प्रादुर्भूते हिरण्यद्विरदमतिमदध्वां-

न्ततन्त्रन्निहन्तुन्धीरे सच्छास्त्रयोनौ मम भुवन-
गुरावस्तुभक्तिर्नृसिंहे ॥ १ ॥

प्रह्लादाख्यो दैत्यस्तदभीष्टानान्दानं यस्मात् । पक्षे प्रकृष्टो ह्लादो ब्रह्मानन्दस्तस्याऽभीष्टानान्धर्मार्थकामानाञ्च दानं यस्मात्तस्मिन् । विबुधानान्देवानां पण्डितानाञ्च समुदायेन स्तूयमानमपदानं पूर्वचरित्रं यस्य तस्मिन् । "अपदानङ्कर्मवृत्तं" इत्यमरः । हिरण्याख्यो योग्यतया हिरण्यकशिपुः । नामैकदेशे नामग्रहणात् । स एव द्विरदः सिंहवध्यत्वात् । कीदृशं । अतिशयितमद एवाज्ञानपरिणामत्वाद्ध्वान्तन्तत्तन्त्रंतदधीनं । मदपरवशमिति यावत् । पक्षे हिरण्यन्धनोपलक्षणं । द्विरदाः सेनाङ्गोपलक्षणं । मतिरसच्छास्त्रज्ञानं । तत्संबन्धि मदो येषां तेषां ध्वान्तानांधकारोऽन्ते येषान्नाम्नि तेषामाध्वनान्तन्त्रं शास्त्रं निहन्तुं । शेषक्षोणीभृतः शेषाचलस्यान्तश्शोभमानं पदं स्थानं यस्य तस्याहोबलाख्यक्षेत्रस्थ गर्भान्मध्यात् । पक्षे अशेषाणां समस्तानां क्षोणीभृतां राज्ञां मध्ये प्रविलसिते पदे चरणे यस्याऽहोबलाख्यस्य पुरुषधौरेयस्य तस्य क्षेत्रं पत्नी तस्याः गर्भात् प्रादुर्भूते । धीरं धैर्यशालिनि । धियं रातीति धीरः पण्डितः तस्मिन् सतां शास्त्राणां योनिःकारणं । "यस्य निश्वसितं वेदाः । छन्दांसि जज्ञिरे तस्मात्" इत्यादि श्रवणात् सच्छास्त्राण्येव योनिः ज्ञापकहेतुर्यस्येतिवा । "तन्त्वौपनिषदं पुरु-

पृच्छामि" (बृ० उ० ३–९–२६) इति श्रवणात् । शास्त्रयोनित्वाधिकरणे (ब्र० सु० १–१–३) द्वेधापि व्याख्यानात् । पक्षे सच्छास्त्राणां योनिः कर्ता ग्रन्थकर्तेति यावत् । तस्मिन्भुवनगुरौ नृसिंहे नरकेसरिणि नृसिंहनामके च भक्तिरस्त्विति प्रार्थना । तत्रोपमया उपमाया वा अभेदस्य वा ध्वनिः । श्लेषालङ्कारः । सोपि च प्रकृतोभयविषयकः सभङ्गोऽभङ्गश्च । स्रग्धरावृत्तं ॥ (१)

आप्राचः कामरूपाद्द्रुहिणसुतनदप्लाविताद्-
प्रतीचो गान्धारात्सिन्धुसान्द्राद्रघुवरचरितादा-
च सेतोरवाचः । आकेदारादुदीचस्तुहिनगह-
नतः सन्ति विद्वत्समाजा ये ये तानेष यत्न-
स्सुखयतु स्मृजान्कश्चमत्कर्तुमीष्टे ॥ २ ॥

कामरूपगान्धारौ देशौ । सेतुकेदारौ क्षेत्रे । द्रुहिणसुतसिन्धू नदविशेषौ । विदुषां विद्योपासकानां समाजाः । "न शिल्पादिज्ञानयुक्ते विद्वच्छब्दः प्रयुज्यते" इत्यादिना विद्वच्छब्दस्योपासकपरतया त्रिशत्यां (श्लो० ८९) प्रदर्शनात् । समजाः पशुगणाः । "पशूनां समजोन्येषां समाज" इत्यमरः ॥ २ ॥

स जयति महा प्रकाशो यस्मिन्दृष्टे न दृश्यते किमपि। कथमिव तस्मिन् ज्ञाते सर्वं ज्ञातङ्किलोच्यते वेदे ॥ ३ ॥

सर्वेषामात्मत्वेन प्रसिद्धो महान्देशकालाद्यनवच्छिन्नः प्रकाशः प्रवेदाऽनावृतात्मस्वरूपज्योतिः । "स्वरूपज्योतिरेवान्तः"* इति रहस्यागमात् । "न तत्र सूर्यो भाति" (क० उ० ५–१५) इत्यादिश्रवणाच्च । जयति सर्वोत्कर्षेण वर्तते । यस्मिन्नधिष्ठाने दृष्टे निर्विकल्पात्मकचरमवृत्तिविषयीकृते सति किमपि दृश्यन्नदृश्यते । अधिष्ठानज्ञाननाश्यत्वात् । अत एव "एकविज्ञानेन सर्वविज्ञानं" (छा० उ० ६–१) श्रुतावुक्तं कथं सङ्गच्छत इति साश्चर्यमाह । कथमिवेति अथवा विवर्तवादं वेदान्ति सम्मतं परिणामवादी तान्त्रिको दूषयति कथमिवेति । तन्मते मृद्घटादि दृष्टान्तानुपपत्तिरित्यर्थः । अत्रेयन्तान्त्रिकी प्रक्रिया । इच्छामि जानामीत्यादौ उत्तमपुरुषान्तर्भासमानं स्फुरणान्वयि ज्ञानमेव प्रकाशाभिधं ब्रह्म । तच्च सर्वज्ञत्व सर्वेश्वरत्वसर्वकर्तृत्वपूर्णत्वव्यापकत्वादि शक्तिसंवलितं । तस्य चानन्दरूपांश एव स्फुरणं । पराहन्ता विमर्शः परा ललिता भट्टारिका त्रिपुरसुन्दरी इत्यादि पदैर्व्यवह्रीयते । उक्तं च विरूपाक्ष पञ्चा-

---

* परावागनपायिनी इति पाठभेदः ।

शिकायां विश्वशरीरस्कन्धे। "ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति। एते चाहन्तयाः पर्यायाः शंभुनोच्यन्ते" इति। परा-हन्तामन्तरेणेदन्ताया असंस्फुरणादहमिदमोस्संसंबन्धिकत्वादिदं पद-ग्रम्यस्य दृश्यस्याहन्तारूपशक्त्या तद्विशिष्टब्रह्मणावा जन्यत्वं। तच्च दृश्यन्तत्परिणाम एव। "अस्यां परिणतायान्तु न किंचदवशिष्यते" इति वामकेश्वरतन्त्रात्। "वाचारंभणं" (छा० उ० ६–१–४) इत्यादि श्रुतीनां तत्रैव स्वारस्याच्च। शक्ति शक्तिमतो रुपादा-नोपादेययोरत्यन्तमभेदः। न पुनरौपनिषदादिवत् भेदाभेदौ। अत एव "सर्वं खल्विदं ब्रह्म" (छा० उ० ३–१४–१) इति सामानाधिकरण्यमभेदे। न पुनर्बाधायां। अद्वैतश्रुतयस्सर्वा अप्येत-तदभिप्रायिका एवाविरुद्धाः। सर्वप्रमाणमूर्धन्यया श्रुत्या तदनुसा-रितन्त्रैश्च अद्वैते कथिते तद्विरुद्धत्वेन भासमानः कार्यकारणयो-र्भेदांश एव कारेणतु आस्तां। न पुनस्सर्वोपि प्रपञ्चः। "नेह नानास्ति" (ब्र० उ० ४–४–१९) इत्यादि (बहु) श्रुतिष्वपि भेदांशस्यैव निषेधो न प्रपञ्चस्य। "एकमेवाद्वितीयं" (छा०उ०६-२-१) इत्यादौ श्रूयमाणो भेदवत्प्रपञ्चाभावोपि विशेषणाभाव प्रयुक्त एव। अत एव भामत्यां "कटकमकुटभेदस्यैव कटकन्यूनसत्ताकत्वं न मकुटस्योक्तपरिणामस्य परिणामिसमानसत्ताकत्वस्यावश्यकत्वात्"। "मायामात्रमिदन्द्वैतं" (गौड० १–१७) इत्यत्रापि द्वैतशब्देन

भेदस्यैव मिथ्यात्वमुच्यते । न भेदवतः । तथात्वेतु प्रतियोगित संबन्धेन जगत इवानुयोगितासंबन्धेन ब्रह्मणो भेदवत्वस्य सत्वात् । अभावो निरूप्यत इति न्यायसिद्धत्वाविशेषात् मिथ्यात्वापत्तेः । ततश्च श्रुतेरपि परिणामवाद एव संमतः सिध्यति । भगवता व्यासेनापि "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" (ब्र० सू० १–४–२३) इत्यस्मिन्नधिकरणे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञां मृद्घटनखनिकृन्तनादि दृष्टान्तं "बहुस्यां प्रजायेय" (तै० उ० २–७) इत्यभिध्योपदेशादिकञ्च अनुसन्दधानेन परिणामवाद एवाभिप्रेतः । कण्ठरवेण उक्तश्च "आत्मकृतेः परिणामात्" (ब्र० सू० १–४–२६) इति सूत्रे । भाष्यकारैरपि । तत्र विवर्तवादानुसारेण व्याचक्षाणैरपि सौन्दर्यलहर्यां "मनस्त्वं व्योमत्वं" (३९) इति श्लोके "त्वयि परिणतायां" इति स्वाभिमतः परिणामवादः एव स्फुटीकृतः । अस्मिन् पक्षे रहस्यनामसाहस्रे "मिथ्याजगदधिष्ठाना" (७३९) इत्यादौ श्रूयमाणं मिथ्यात्वंतु स्वानातिरिक्तरूपत्वं घटादिरूपेण॥नित्यत्वं ब्रह्मरूपेण नित्यत्वं मृद्घटयोरभेदेपि घटरूपेण ध्वस्तत्वं मृद्रूपेणाध्वस्तत्वं चेत्यादिवद्विरुद्धधर्मनिरासादिकमूह्यमित्यादिकः शांभवानन्दकल्पलतायां विस्तरः ॥ ३ ॥

इममेवार्थं श्लोकद्वयेनाह ।

नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्तिः । तद्योगादेव शिवो जगदुत्पादयति पाति संहरति ॥ ४ ॥

इहोत्पादनादि त्रयं तिरोधानानुग्रहयोरूपलक्षणं ॥ ४ ॥

सावश्यंविज्ञेया यत्परिणामादिभूतेषु* । अर्थमयी शब्दमयी चक्रमयी देहमय्यपि च सृष्टिः ॥५॥

अवश्यं । सर्वविज्ञानसाधनत्वान्मोक्षादिपुरुषार्थप्रदत्वाच्च । अर्थमयी शिवादिक्षित्यंतषट्त्रिंशत्तत्वरूपा । शब्दमयी परादिवैखर्यन्ता । चक्रमयी बिंद्वादिभूगृहांता । देहमयी सूक्ष्मादिस्थूलांता ॥ ५ ॥

तत्ज्ञानार्थमुपाया विद्यालोके चतुर्दशप्रोक्ताः । तेष्वपि च सारभूता वेदास्तत्रापि गायत्री ॥ ६ ॥

चतुर्दश । चत्वारो वेदाः षडंगानि न्यायो मीमांसा पुराणं धर्मशास्त्रं चेति । तन्त्राणां धर्मशास्त्रेन्तर्भावः । तेषां प्रामाण्यसमर्थनमस्मदीये त्रिपुरसुंदरी बाह्यवरिवस्याविधौ द्रष्टव्यं । तंत्रराजव्या-

* यत्परिणामादभूदेषा—इति पाठभेदः

ख्याने च विस्तरेण तंत्राणां धर्मशास्त्रेन्तर्भावः प्रपंचयिष्यते एवं च न शिष्टाकोपाधिकरणस्थवार्तिकविरोधः। शास्त्रपरिमाणानतिक्रमात् ॥ ६ ॥

तस्या रूपद्वितयं तत्रैकं* यत्प्रपठ्यतेस्पष्टं। वेदेषु चतुर्ष्वपि परमत्यंतं गोपनीयतरं ॥ ७ ॥

तस्या गायत्र्याः। स्पष्टमस्पष्टं चेति पदच्छेदः। आवृत्या चरणत्रयं तत्सवितुरित्यादि स्पष्टं। परो रजसे सावदोमिति चतुर्थचरणं त्वस्पष्टमित्यर्थः। परं श्रीविद्याख्यं द्वितीयं रूपं ॥ ७ ॥

यद्यपि तन्त्रराजादौ सौन्दर्यलहर्यांचहादिविद्याया एव प्रथममुद्धारो दृश्यते। तथापि "श्रीविद्यैव तु मंत्राणां तत्रकादिर्यथापरा" इति (ल० स०।) वचनात्। षोडशीघटकत्वाच्च। "यदक्षरैकमात्रेपि" "यदेकादशमाधारम्" इत्यादि रहस्यार्थप्रतिपाद्यक्षरशालित्वाच्च। त्रिशत्यामस्या एवादराच्च। त्रिपुरोपनिषद्येतन्मूलकत्वेनैवान्यासामुद्धाराच्च। कादिविद्यायाः प्राधान्यमिति द्योतयन् तस्याः प्रतीकमादत्ते। काम इति।

कामो योनिः कमलेत्येवं संकेतितैः शब्दैः। व्यवहरति न प्रकाशं यां विद्यां वेदपुरुषोपि॥८॥

---

* यत्तु.

"कामो योनिः कमला वज्रपाणिर्गुहाहसामातरिश्वाभ्रमिंद्रः। पुनर्गुहा सकला मायया च पुरूच्येषाविश्वमातादिविद्या" इति सांख्यायन श्रुतिः। कामो मातरिश्वाच ककारः। योनिरेकारः। कमला तुरीयस्वरः। वज्रपाणिरिंद्रश्चलकारः। गुहाद्वयं माया च लज्जाबीजं। हसेति सकलेति च स्वरूपं। गुहया सह समासात्बहुवचनं न पुनःसकारो दीर्घः। एवंलकारोपि। अभ्रंहकारः। एतादृशैस्संकेतितशब्दैर्व्यवहारादत्यंतगोपनीयत्वं समर्थितं भवति ॥८॥

विद्यावर्णानुद्धरति।

क्रोधीशः श्रीकंठारूढः कोणत्रयं लक्ष्मीः।
मांसमनुत्तररुढं वाग्भवकुटं प्रकीर्तितं प्रथमम् ॥ ९ ॥

शिवहंसब्रह्मवियच्छक्राः प्रत्येकमक्षरारूढाः।
द्वैतीयीकं कूटं कथितं तत्कामराजाख्यं ॥१०॥

शिवतो वियतो मुक्तं तृतीयमिदमेव शक्तिकूटाख्यं। हृल्लेखानां त्रितयं कूटत्रितयेपि योज्यसंते स्यात् ॥ ११ ॥

क्रोधीशो ब्रह्माच ककारः । श्रीकण्ठोनुत्तरमक्षरंचाकारः । तमारूढस्तेन युक्तः । कोणत्रयंयोनिः । लक्ष्मीः कमला । मांसंशक्रश्चेन्द्रः शिवोवियच्च हकारः । हंसः सकारः । अक्षरसमुहात्मकत्वात् कूटत्वव्यपदेशः ॥ ११ ॥

हृल्लेखायाः स्वरूपं तु व्योमाग्निर्वामलोचनं ।
बिन्द्वर्धचंद्ररोधिन्यो नादनादांतशक्तयः॥ १२॥

व्यापिकासमनोन्मन्य इति द्वादश संहतिः ।
बिंद्वादीनां नवानां तु समष्टिर्नाद उच्यते ॥ १३ ॥

व्योम हकारः केवलो न त्वकारविशिष्टः । अग्निः रेफस्तादृशः । वामलोचनमीकारः । बिन्द्वादयो नवापि सूक्ष्मसूक्ष्मतरसूक्ष्मतमकालैरुच्चार्याः ध्वनिविशेषा वर्णविशेषा वा । नचककारादिवत्स्पष्टमनुच्चार्यत्वात् । तंत्रीस्वरतुल्यत्वेन श्रूयमाणत्वाच्च । कारप्रत्ययाद्यभावाच्च। "बीजबिंदुध्वनीनां च त्रिकूटेषु ग्रहात्मिका" इत्यादौ ध्वनिपदेनैव तंत्रेषु व्यवहाराच्च न वर्णत्वमर्धचंद्रादेरिति वाच्यं । अनुस्वारविसर्गादावुक्तहेतुसत्वेपि वर्णत्वस्येष्टत्वात् । न च तादृशसंख्याविरोधादेव नात्रवर्णत्वं । तत्र स्पष्टोच्चार्याणामेव गणनात् । न च ताल्वादिपरिगणितस्थाना(द्य)नभिव्यंग्यत्वं । नादात्मकत्वस्य स्पष्टमुक्तत्वात् । अत एव चतुश्शतीशास्त्रे नादस्यार्थवर्णनं संगच्छते । न च रथघोषवत्पदार्थ-

स्मारकत्वोपपत्तिः । तत्र हि तत्कालकरणीयत्वसंबंधेन माहेंद्रस्तोत्रोपाकरणस्य स्मृतिविषयताया वाचनिकत्वेन रथघोषसामान्यस्य लौकिकादिसाधारणस्य स्मारकत्वाभावेन तस्य तत्र शक्तेरयोगात् । प्रकृते तु न तथेति । वैषम्यात् । " हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाक्षरैः " इत्यादौ प्रतिहृल्लेखं हकाररेफेकारानुस्वारनादपंचकमिति पंचदशाक्षराणीत्युक्त्या नादेक्षरत्वव्यवहारस्यासकृद्योगिनीहृदये । " भूमिश्चंद्रशिवो मायाशक्तिःकृष्णाध्वमादनौ । अर्धचंद्रश्च बिंदुश्च नवार्णो *मेरुरुच्यते । "महा त्रिपुरसुंदर्या मंत्रा मेरुसमुद्भवाः" इतिज्ञानार्णवादावप्यसकृद्व्यवहारस्य दर्शनाच्च । ध्वनिपदेन व्यवहारस्तु तत्तुल्यत्वात् । लक्षणया ध्वनिपर्यायनादपदवाच्यत्वान्नेयार्थरूपलक्षणया वा नेय इति टीका । एवं च प्रथम त्रितीय कूटे अष्टादश वर्णात्मके । मध्यमकूटं तु चतुरधिकं । संहत्याष्टपंचाशद्वर्णात्मिका विद्येति ध्येयं ॥ १३ ॥

यद्यपि बिंदुविनिर्मुक्तानामेव नादसंज्ञा मंत्रशास्त्रे । तथापि व्यवहारसौकर्याय तत्सहितानामेव साक्तेतिसिद्धमेवाह ।

प्रथमेऽष्टादशवर्णाद्द्वाविंशतिरक्षराणि मध्ये स्युः ।
प्रथमेन तुल्यमंत्यं संघातेनाष्टपंचाशत् ॥ १४ ॥

---

* मनुरिति पाठ भेदः

वर्णानां कालानाह ।

मात्राद्वितयोच्चार्या कामकला च त्रिकोणा च ।
बिंदुरहितहृल्लेखा मात्रा कालत्रयोच्चार्याः ॥ १५ ॥
अन्येषां वर्णानां मात्राकालोर्धमात्रया सहितः ।
बिंदोरर्धं मात्रा परे परे चापि पूर्वपूर्वार्धाः ॥ १६ ॥
संहत्यैकलवोनोमात्राकालोऽस्य नादस्य ।

मात्रा लघ्वक्षरस्य कालः । तद्विगुणो गुर्वक्षरस्य । अत एव कामकला त्रिकोणो योनिश्च द्विमात्रा । हृल्लेखायां द्वयोर्व्यंजनयोरेका मात्रा । कामकलाया द्वे मात्रे इति तिस्रः । अन्येषा मकारसहितानां कादिदशवर्णानां । बिंदोरपि व्यंजनत्वात् अर्धमात्रा । "एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं त्वर्धमात्रकं" इति वचनात् । परे परं अर्धचंद्ररोधिन्यादयः पूर्वपूर्वार्धाः। अर्धचंद्रस्यार्धकालो रोधिन्याः। रोधिन्यर्धकालो नादस्येत्यादि क्रमेण कालवन्तः । अयं भावः । काल(परिमाणं)परमाणुर्लव इत्युच्यते । "नलिनीपत्रसंहत्यास्सूक्ष्मसूच्यभिव्रथने । दले दले तु यः कालः स कालो लवसंज्ञकः । अतस्सूक्ष्मतमः काले नोपलभ्यो भृगूद्वह" इति वचनात् । षट्पंचाशदुत्तरशतद्वयलवैरेकामात्रा । बिंदोर-

ष्टाविंशत्युत्तरशतं लवाः । अर्धचंद्रस्य चतुष्षष्टिः। रोधिन्याद्वात्रिंशत्। नादस्य षोडश । नादांतस्याष्टौ । शक्तेश्चत्वारः । व्यापिकाया द्वौ लवौ। समनाया एको लवः । उन्मनायास्तु नास्त्येव कालः । यद्यपि योगिनीहृदये चक्रसंकेते ।" दीपाकारोऽर्धमात्रश्च " इत्यनेन विंदोः कालमुक्त्वाऽर्धचंद्रादेः शक्तिपर्यंतस्य चतुरंशाष्टांशषोडशांशादिरूपभागद्वैगुण्यंकालस्योक्त्वाशक्त्यादीनां पूर्वपूर्वद्विगुणकालवत्वं सामान्येनोक्तं। "चतुष्षष्टिस्तदूर्ध्वं तु द्विगुणं द्विगुणं ततः" इति। तेन च वचनेन मात्राया द्वादशोत्तरपंचशततमो भाग उन्मनाकालः । मात्रास्वरूपं च द्वादशोत्तरपंचशतलवात्मकत्वमेव प्रतीयते । अतएव " देशकालानवच्छिन्नं तदूर्ध्वं परमं महत्" इत्युत्तर ग्रंथेप्युन्मनायाः परत एव कालानवच्छेद उक्त इति व्य(यु)क्तं प्रतीयते । तथापि चतुष्षष्टिरिति श्लोकस्य शक्तेः चतुष्षष्टितमो मात्राभागस्ततो द्विगुणं व्यापिकाया अष्टाविंशत्युत्तरशततमो भागस्ततो द्विगुणं समनायाः षट्पंचाशदुत्तरशतद्वयात्मको भाग इत्यर्थस्ततस्तदूर्ध्वमिति पदाभ्यां द्विगुणपदद्वयेन च स्पष्टं प्रतीयते । अतएवोत्तरार्धे । " शक्त्यादीनां च मात्रांशो मनोन्मन्यास्तथोन्मनी " इत्यत्र मनोन्मनी पदस्य समनापर्यायस्य समनापर्यंतानामित्यर्थकत्वमंगीकृत्य शक्त्यादीनां तिसृणामित्यमृतानंदैर्व्याख्यातं । नादस्य बिन्द्वादिनवकस्य ।

एकादशांवाक्कूटे सार्धा एकादशोदिता मध्ये ॥१७॥

साद्धां अष्टौ शक्तावेकैकलवोनिता मात्राः ।
संहत्यैकत्रिंशन्मात्रा मंत्रे लवत्रयन्यूनाः ॥ १८ ॥

शक्तौ तृतीयकूटे ॥ १८ ॥

उत्पत्तिस्थानयत्नावाह ।

कण्ठे च कण्ठतालुनि तालुनि दंतेषु मूर्ध्नि नासायां । स्पृष्टविवाराद्यांतरबाह्यैर्यत्नैस्तदक्षरोत्पत्तिः ॥ १९ ॥

ककारत्रयं अकारदशकं हकारपंचकं च कण्ठे । द्वितीयाक्षरं कण्ठतालुनि । प्राण्यंगत्वादेकवद्भावः । ईकारचतुष्टयं तालुनि । लकारत्रयं सकारद्वयं च दंतेषु । रेफत्रयं मूर्ध्नि । बिंद्वादिनवकत्रयं नासायां । स्पृष्टेति । ककाराः स्पृष्टयत्नाः । अकाराः संवृताः । ईकारा एकारश्च विवृताः । रेफा लकाराश्चेषत्स्पृष्टाः । हकाराः सकारौचेषद्विवृताः । बिन्द्वादयः संवृततमाः । इत्याभ्यन्तरो यत्नः । ककाराः विवारश्वासघोषवन्तः । सकारौ महाप्राणवन्तौ । विवारादिमन्तौ च स्वरास्सर्वेऽप्युदात्ताः । रेफलकाराश्च संवारनादघोषाल्पप्राणवन्तः । हकारास्संवारादित्रयवन्तो महाप्राणवन्तश्च । बिंद्वादयस्त्वात्यंतिकसंवारादिचतुष्कवंतः । इति बाह्ययत्नः ॥ १९ ॥

अथ वर्णानां स्थितिस्थानं रूपमाकारं चाह ।

प्रलयाग्निनिभं प्रथमं मूलाधारादनाहतं स्पृशति ।
तस्मादाज्ञाचक्रं द्वितीयकूटं तु कोटिसूर्याभम् ॥ २० ॥
तस्माल्ललाटमध्यं तार्तीयं कोटिचंद्राभम् ।
मालामणिवद्वर्णाः क्रमेण भाव्या उपर्युपरि ॥ २१ ॥

मूलाधारादित्यादि पञ्चमीत्रयं ल्यब्लोपे मूलाधारमारभ्येत्यर्थः । तस्मादनाहतमारभ्य । तस्मादाज्ञाचक्रमारभ्य । इदं च स्थानत्रयं बिंद्वादिरहितकूटत्रयस्यैव ॥ सुषुम्नाख्यानाडीमूलाग्रयोर्मध्ये सहस्रदलकमले । मध्ये चाष्टदलषड्दलादीनि त्रिंशत्पद्मानि सविस्तरं स्वच्छंदसंग्रहादौ प्रपंचितानि । तत्र गुदोपरि द्व्यंगुलोर्ध्वं लिंगे नाभौ हृदि कंठे भ्रूमध्ये च मुलाधारस्वाधिष्ठानमणिपूरानाहत विशुध्द्याज्ञानामकानि चतुष्षट्दशद्वादशषोडशद्विदलानि द्विद्विग्रंथिमध्यसंदष्टानि चक्रवाच्यान्यपि षट् पद्मानि संतीत्यन्यत्र विस्तरः ॥ २१ ॥

आधारोत्थितनादो गुण इव परिभाति वर्ण-
मध्यगतः ॥

अत्रेयं शब्दसृष्टिप्रक्रिया । वटबीजांतर्गतवटवृक्षीयसूक्ष्मरूपतुल्यशब्दसृष्टिसूक्ष्मरूपशालिनी पूर्वोक्तरूपात्रिपुरसुंदर्येव तादृश-

सूक्ष्मरूपवत्वप्रवृत्तिनिमित्तकपरापदवाच्या । सैव च माति तरति काशयतीति च व्युत्पत्त्या मातृकेत्युच्यते । तस्यां च निर्विकारायामप्यनादिसिद्धप्राण्यदृष्टवशात्स्वांतस्संहृत विश्वसिसृक्षोत्पद्यते । ततः स्त्रष्टव्यपदार्थानालोचयति। "तदैक्षतबहुस्यां प्रजायेय" इति (तै० उ० २-६)श्रुतेः। तादृशमीक्षणमेव प्रवृत्तिनिमित्तीकृत्य तस्यां पश्यन्तीति पदं प्रवर्तते । सैव च पश्यन्त्याख्या मातृका (कारण) सरणिमुत्तीर्णत्वादुत्तीर्णेत्युच्यते तदवयवाश्च वामादयोष्टौ शक्तयोन्यित्र प्रपंचिताः। अतः सैव व्यष्टिसमष्टिवेषेण नवविधा। ततो नव नादा अविकृतशून्यादयो जाताः। तत्समष्टिश्च नादध्वन्यादि॰ पदवाच्या नातिसूक्ष्मापरावत् नातिस्थूला वैखरीवत् अतो मध्यमाख्या मातृका मध्यमावयवरूपं अविकृतशून्यस्पर्शनादध्वनिबिंदुशक्तिबीजाक्षराख्यं नादनवकं मूलाधारादिषट्के नादे नादांते ब्रह्मरंध्रे च स्थितं । नवभिर्नादैः अकचटतपयशक्षाख्यवर्गनवकवती वैखर्याख्या मातृका जाता। वैनिश्चयेनस्पष्टतरत्वात् खं कर्णविवरवर्तिनभोरूपश्रोत्रेन्द्रियं राति गच्छति तज्जन्य ज्ञानविषयो भवतीतिव्युत्पत्तेरित्याद्यन्यतोविस्तरः। एवं च ककारादौ कत्वादिवर्णधर्माणां षड्जत्वादिध्वनिधर्माणां चानुभूयमानत्वात् परिणामे परिणामिनोनुस्यूततायाः मृद्घटे दर्शनाच्च वर्णेषु नादोनुस्यूतः। तंतुविशेषजन्यः पटविशेषो वर्णकपदवाच्यः। तत्र कप्रत्ययपरित्यगेन प्रयोगस्तु अक्षरवाचकवर्णपदेन श्लेषार्थः । वर्णकाख्यपटविशेषे

पादानभूततन्तुविशेषवन्मालामण्याधारसूत्रवच्चेत्यर्थः । वर्णमध्यगत इत्यस्य द्वयोर्वर्णयोर्मध्यभागे वर्णशरीरांतर्भागे च स्थित इत्यर्थः । अयं भावः । द्वयोर्वर्णयोर्मध्यभागे मणिद्वयमध्यभागस्थशुद्धसूत्रवत् शुद्धनादस्य भा(व)नं । वर्णशरीरांतर्भागे तु पटाभेदेन संवलिततंतुवत् घटांतर्मृद्वच्च तत्तद्वर्णाभेदेनैव नादस्य भा(व)नं । न पुनस्तत्र मण्यंतर्भूत (गत) सूत्रदृष्टांतः । तस्य मणितोत्यंतभिन्नत्वादिति ॥

अथात्र शिष्टस्य बिंद्वादिनवकस्य स्थितिः स्थानरूपाकारानाह ।

मध्येफालं बिंदुर्दीप इवाभाति वर्तुलाकारः ॥ २२ ॥
तदुपरिमितोर्धचंद्रोन्वर्थः कांत्या तथा कृत्या ।
अथ रोधिनीतदूर्ध्वं त्रिकोणरूपाच चंद्रिकाकांतिः॥२३॥
नादस्तु पद्मरागवद्दण्डद्वयमध्यवर्तिनीव सिरा ।
नादांतस्तटिदाभः सव्यस्थितबिंदुयुक्तलाङ्गलवत्॥२४॥
तिर्यक् बिंदुद्वितये वामोद्गच्छत् सिराकृतिश्शक्तिः ॥
बिंदूद्गच्छत्यश्राकाराथ व्यापिका प्रोक्ता ॥ २५ ॥
ऊर्ध्वाधोबिंदुद्वयसंयुतरेखाकृतिस्समना ।
सैवोर्ध्वबिंदुहीनोन्मनातदूर्ध्वं महाबिंदुः ॥ २६ ॥

शक्त्यादीनां तु वपुर्द्वादशरविकांतिपुंजाभम् ।

मध्येफालं फालस्य मध्ये । पारे मध्ये षष्ठ्या वेति समासः । कांत्या आकृत्या चान्वर्थः । अर्धचंद्रवत् कांतिराकारश्चेत्यर्थः । अंडस्थानीयौ द्वौ बिंदू सिरास्थानीया मध्यरेखा चेति त्रयं संहत्य नादस्याकारः॥"बिन्दुद्वयांतरे दंडः शिवरूपो मणिप्रभः" इति चक्रसंकेतोक्तशिवोमुष्कद्वयमध्यवर्तिनी नाडी। मणिः पद्मराग इति तु सांप्रदायिकी व्याख्या। दंडस्य शिवरूपत्वविशेषणं घटनाद(ण्ड)मध्ययोर्निरासाय । केशतुल्यपिष्टविकारेषु पायसोपयुक्तेषु शिवपदप्रयोगात् इत्यपि व्याख्यानातीव विरुद्धा । ऊर्ध्वाग्रं दक्षिणारं लांगलं । वामभागे बिंदुरेक इति नादांताकारः । विसर्जनीयवदूर्ध्वाधो बिंदुद्वयमिति भ्रमनिरासायाह। तिर्यगिति । वामात् वामभागस्थ बिंदुमारभ्योर्ध्वं गच्छंती निस्सरंती या सिरा रेखा तदाकारेत्यर्थः। "शक्तिर्वामस्थ बिन्दूद्यत् सिराकारा" इति चक्रसंकेते । आर्ष (एक) त्वभ्रमनिरासाय समस्तस्यापि बिंदुपदस्य पूर्वपदेन सह बहुव्रीह्यवयवत्वेनोत्तरपदेन सह पंचमीतत्पुरुषावयवत्वेनापि काकाक्षिन्यायेनान्वय इति सांप्रदायिकैर्व्याख्यानात् । उद्यत्पदस्य सामान्यवाचकस्यापि बिंदूद्यदिति विशेषे लक्षणायां वा वामस्थात् बिंदोरुद्यंत्याः सिराया आकारो यस्या इत्येव विगृह्य बिंदोर्वामस्थत्व विशेषणबलादेव दक्षिणदिग्भागे निस्सिराक एको बिंदुरस्तीति गम्यत इति व्याख्यायां वा न

कोऽपि क्लेशः। बिंदुसंस्पृष्टाग्रत्रिकोणाकारा व्यापिका ॥ "बिंदुद्वयांतरालस्थऋजुरेखामयी पुनः। स मना" इति वचने(न)शक्तिवत् बिन्दुद्वयं तिर्यग्रूपं मा भूदित्यतः संप्रदायमनुसरन्नाह । उर्ध्वाध इति । संयुताग्रमूलभागयोः संश्लिष्टानत्वस्पृशंती स्थिता। इयं च ब्रह्मरंध्रस्थाना । इयमेव च मनोन्मनीत्यपि व्यवह्रीयते । मनसो यथावस्थितरूपस्यैवाभ्यासविशेषेणैतावत्पर्यंतवृत्युद्गमः सुसाध इत्यतः समनेत्युच्यते । एतदुपरि तु रूपान्तरं प्राप्तस्यैव मनसो धृतिविषय इत्यत उत्क्रांतमनस्कत्वादुन्मना । प्रकृतानुपयुक्तमपि उन्मनोपरिस्थानं चक्रराजस्य त्रिविधभावनांतर्गतनिष्कलभावनायामुपयुक्तत्वेन प्रसंगादाह ॥ तदूर्ध्वं महाबिंदुरिति ॥ शक्त्यादीनामिति समनांतानां तिसृणामिति संप्रदायः । शक्त्यादीनां तिसृणां द्वादशारवितुल्यकांतयस्तनव इति पाठो युक्तः । बिंद्वादिस्वरूपांगविस्तरः स्वच्छंदसंग्रहे द्रष्टव्यः ॥

अथ वर्णानामुच्चारणप्रकारमाह ।

इत्येवं वर्णानां स्थानं ज्ञात्वोच्चरेद्यत्नात् ॥ २७ ॥
नादः प्राथमिकस्तु द्वितीयकूटेन साकमुच्चार्यः ।
द्वैतीयीकं नादं तार्तीयेनोच्चरेन्न पृथक् ॥ २८ ॥
बिंद्वादि नवकयोस्तु प्राक्तनकूटस्थयोरनयोः ।
संम्मेलनेन शबलं तार्तीयीकं विभावयेत् कूटं॥२९॥

बिंद्वादिकसमनांतं क्रमेण तार्तीयमुच्चरेन्नादम् ।
उन्मन्यन्तर्लीनं विभावयेदेतदुच्चरणम् ॥ ३० ॥

स्थानं कण्ठाद्युत्पत्तिस्थानं मूलाधारादिस्थितिस्थानं च । यत्नादांतरबाह्ययत्नपूर्वकं । इदं च मानसं जपातिरिक्तविषयं । तत्र तत्तत्स्थानयत्नविभावनमात्रस्यैवोपयोग इति द्रष्टव्यं । नादः बिंद्वादिनवकं । पूर्वपूर्वकूटस्थनादस्योत्तरोत्तरकूटोच्चारणेनैवोच्चारितप्रायत्वात् न तत्र पार्थक्येन यत्नः कालविलंबो वा कार्य इत्यर्थः । तृतीयकूटेतूत्तरकूटाभावात् तदुभयमपेक्षितमित्याह बिन्द्वादिकेति ॥ ३० ॥

पूर्वं विद्यास्वरूपस्य काल उक्तः । इदानीमुच्चारणकालं निष्कृष्याह ।

आद्ये दश मध्ये ताः सार्धास्तार्तीयकूटेऽष्टौ ।
एकलवोना ऊनत्रिंशन्मात्रामनोर्जपे कालः ॥ ३१ ॥

आद्ये कूटे दश मात्राः । मध्ये कामराजकूटे । ताः दश सार्द्धा मात्राः । तार्तीयकूटेऽष्टावित्यस्य पूर्वापरवर्तिपदद्वयं काकाक्षिन्यायेन द्विरन्वयितव्यं । तेनैकलवोनाः सार्द्धा अष्टौ मात्रास्त्रितीयकूटे यथा पूर्वमवस्थिता इत्यर्थः । संहत्यत्वाह । एकलवोना इति । ऊनत्रिंशत् एकोनात्रिंशत् । जपे वाचिके । न तु मानसे । पूर्वोक्तकालादयः ।

प्रथमद्वितीयकूटस्थास्तु यत्र न्यासादौ संध्यांगभूतैकैककूटमात्र-जपेच प्रातिस्विकमुच्चारणेन कूटानां विनियोगविधिस्तत्रैव सार्थक इति ज्ञेयं ॥ ३१ ॥

अथ कूटानां व्यष्टिसमष्टिभेदेन चतुर्धा भिन्नानां स्वरूपविशेषानाह।

व्यष्टिसमष्टिविभेदादस्यां चत्वारि बीजानि ।
सृष्टिस्थितिसंहारानाख्यारूपाणि भावनीयानि ॥३२

पुटधामतत्वपीठान्वयलिंगकमातृतत्समष्टीनाम् ।
रूपांतराणि बीजान्यमूनि चत्वारि चिंतनीयानि ॥३३॥

अनाख्या तिरोधानानुग्रहयोस्समष्टिः। कृत्यपंचकेष्वपि औदासीन्यावलंबनरूपावस्थाविशेषो वा। पुटादिषट्कं धामसप्तकं च त्रित्रिरूपं पृथक् पृथक् तत्समष्टिरेकैकेत्येवं चत्वारि चत्वारि यथा पुटानि ज्ञातृज्ञानज्ञेयानि तत्सामरस्यं च । धामानि चक्रनाथदशाशक्तित्रयात्मरूपाणि सप्त। तत्र चक्राणि अग्निचक्रसूर्यचक्रसोमचक्राणि ब्रह्मचक्रं च। नाथाः मित्रेशनाथषष्ठीशनाथोड्डीशनाथाश्चर्यानंदनाथाश्च ॥ दशाः जाग्रत्स्वप्नसुषुप्तयस्तुरीयाच। शक्तयः वामा ज्येष्ठा रौद्रः शांता च। इच्छा ज्ञानक्रिया अंबिका च कामेश्वरी वज्रेश्वरी भगमालिन्योमहात्रिपुरसुंदरीच। आत्मानः आत्मांतरात्म परमात्मानो ज्ञानात्मा च । तत्वानि आत्मतत्वविद्यातत्वशिवतत्वानि सर्वतत्वं च। पीठानि काम-

पूर्णगिरिजालंधराणि ओड्याणपीठंच । अन्वयाः प्राक् दक्षिणपश्चिमान्वयाः उत्तरान्वयश्च । एत एव समयपदेनाम्नायपदेन च कथ्यंते । लिंगानि स्वयंभूबाणेतराणि परंच । मातृकाः पश्यंती मध्यमावैखर्यः परा च । धामपदार्थत्वेनोक्तं शक्तित्रयमपि मातृका पदार्थः ॥ ३३॥

अथ प्रत्यक्षरं स्वरूपमाह ॥

एकैकस्मिन् कर्मणि सृष्ट्यादिविभेदत स्त्रिविधे ।
ब्रह्माद्या अधिपतयो भारत्यादि स्वशक्तिभि-
स्सहिताः ॥ ३४ ॥

ब्रह्मादयस्त्रयोमीभारत्याद्याश्च शक्तयस्तिस्रः ।
प्रत्यक्षरस्वरूपाः शाक्तार्थे वक्ष्यमाणया रीत्या ॥३५

सृष्टिकर्मत्रिविधं । सृष्टिसृष्टिः सृष्टिस्थितिः सृष्टिसंहृतिश्चेति । एवं स्थितिकर्म्म । स्थितिसृष्टिः स्थितिस्थितिः स्थितिसंहृतिश्चेति । एवं संहृतिकर्मापि । संहृतिसृष्टिः संहृतिस्थितिः संहृतिसंहृतिश्चेति । अत्र प्रतित्रिकं ब्रह्मादयस्त्रयो ब्रह्माविष्णुरुद्राः भारती पृथिवी रुद्राणी सहिता अधिपतयः। एवं च प्रथमकूटे ककारो ब्रह्मण एव रूपांतरं। त्रिकोणा तु भारतीस्वरूपा । तुर्यस्वरो विष्णुस्वरूपः । लकारः प्रथिवीरूपः । हकारो रुद्रस्वरूपः । रेफो रुद्राणीरूपः । तुर्यस्वरस्तु

शीतांत्रिकात्मकमिथुनस्वरूपः। द्वितीयकूटे मध्यमहकारं परित्यज्यावशिष्टाक्षरेष्वेषैव रीतिः। तृतीयकूटे तु द्वितीयकूटस्थपरित्यक्तहकारस्य ब्रह्मस्वरूपत्वात् भारतीमारभ्यैव सकारेणारंभः शक्तिकूटत्वेन शक्तेः प्राधान्येन प्रथमं निर्देशः। तदेतदाह। शाक्तार्थे वक्ष्यमाणयेति ॥३५॥

अथावशिष्टानां बिंद्वादीनां स्वरूपमाह।

हृल्लेखा कामकला सपरार्धकला तु कुंडलिनी।
नादाश्चक्रत्रितयात्रितयात्मानो विभाव्यास्युः॥३६॥

अत्र प्रथमकूटे या हृल्लेखा तदंतर्गता या कामकला तस्यां गुरुमुखैकवेद्या या सपरार्धकला सा वह्निकुंडलिनीत्युच्यते। सैव द्वितीयकूटे सूर्यकुंडलिनी। त्रितीये सोमकुंडलिनीति कथ्यते। बिंद्वादिसमष्टिरूपो नादस्तु तत एवोत्पन्नो दीपशिखाग्रवर्तिकज्जललेखावत्। एवंचानाहतमारभ्योत्थितो नादस्त्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसंक्षोभणचक्रत्रयस्य त्रिविधसृष्टिरूपस्यापरं रूपं। आज्ञामारभ्योत्थितो नादः सर्वसौभाग्यदायकसर्वार्थसाधकसर्वरक्षाकरचक्रत्रयस्य त्रिविधस्थितिरूपस्यापरं रूपं। बिंदुस्थानमारभ्योत्थितो नादस्सर्वरोगहरसर्वसिद्धिप्रदसर्वानंदमयचक्रत्रयस्य संहृतित्रयरूपस्यापरं रूपमिति विभावनीयाः॥ ३६॥

अथावस्थापंचकं शून्यषट्कं विषुवत्सप्तकं च जपकाले वि-
भाव्यमाह । इन्द्रियदशकेत्यादिना एवमवस्थेत्यंतेन श्लोकषोडशकेन।

इन्द्रियदशकव्यवहृतिरूपा या जागरावस्था।
तत्र प्रकाशरूपो हेतुर्भाव्यस्त्रितीयगेरेफे ॥ ३७॥

कर्म्मेन्द्रियाणि पंच वाक्पाणिपादपायूपस्थानि । ज्ञानेन्द्रिया-
ण्यपि पंच घ्राणरसनचक्षुस्त्वक्श्रोत्राणि । एतेषां दशानां स्वस्वविष-
योत्पादकत्वं व्यवहारः । स एव जागरावस्था । तत्र हेतुरूपं ज्ञान-
(म) रूपत्वात् भावनादशायां प्रकाशरूपत्वेन त्रितीयकूटस्थरेफस्थाने
भावनीयं ॥ ३७ ॥

अंतःकरणचतुष्कव्यवहारः स्वाप्निकावस्था ।
सा तार्तीयिकारात् बोध्यापि गलस्थले चिंत्या ॥ ३८ ॥

मनोबुद्धिरहंकारश्चित्तंचेत्यंतःकरणानि चत्वारि । तैरेव व्यवहारः
स्वप्नः । तज्जनकः प्रकाशः त्रितीयहृल्लेखास्थः कामकलया बोध्यः ।
अ(त)थापि गलस्थले द्वैतीयीक ळकारे चिंत्यः । गलस्थश्चासौ
ळश्चेतिविग्रहः ॥ ३८ ॥

आंतरवृत्तेर्लयतो लीनप्रायस्य जीवस्य। वेदन-
मेव सुषुप्तिः चिंत्यातार्तीयबिंदौ सा ॥ ३९ ॥

विवरणमते आत्मसुखाज्ञानविषयिकास्तिस्रोऽविद्यावृत्तयः स्वीकृताइत्यत आह। आंतरवृत्तेरिति। अंतःकरणपरिणामरूपवृत्तेरित्यर्थः। वार्तिकमते वृत्तिसामान्याभाव एव सुषुप्तिः। तार्तीयबिंदौ ललाटस्थाने ॥ ३९ ॥

तुर्यावस्था चिदभिव्यंजकनादस्य वेदनं प्रोक्तं।
तद्भावनार्द्धचंद्रादिकं त्रयं व्याप्य कर्तव्या ॥४०॥

अर्द्धचन्द्ररोधिनी नादेषु व्याप्तस्तुर्यावस्थाप्रकाशो भाव्यः ॥

आनंदैकघनत्वं यद्वाचामपि न गोचरो नृणां। तुर्या-
तीतावस्था सा नादांतादि पंचके भाव्या ॥ ४१ ॥

अवस्थापंचकं निरूप्य शून्यषट्कं निरूपयति ॥

तार्तीयीके रेफस्थाने बिंदौच रोधिन्याम्। नादांत-
व्यापिकयोश्चन्द्रकतुल्यानि पंचशून्यानि ॥ ४२ ॥
उन्मन्यानीरूपं षष्ठं चिंत्यं महाशून्यम् ॥

चंद्रकोमयूरपिच्छाग्रगतचंद्राकारं शून्यं । तदुक्तं स्वच्छन्दसंग्रहे । "शिखिपक्षचित्ररूपैः मंडलैः शून्यपंचकं । ध्यायतो नुत्तरे शून्यं परं व्योमतनुर्भवेत्" इति । यद्यपि "अग्न्यादिद्वादशांतेषु त्रींस्त्रीं त्यक्त्वा वरानने । शून्यत्रयं विजानीयादेकैकांतरितं प्रिये ॥ शून्यत्रयात्परे स्थाने महाशून्यं विभावयेत् ।" इति पूजासंकेते । रेफादि महाबिन्द्वन्तद्वादशस्थानेषु मध्ये त्रयं त्रयं त्यक्त्वा एकैकमंतरितं मध्यास्थितं शून्यत्रयं विजानीयादित्यर्थात् । अर्धचन्द्रशक्तिमहाबिन्दुषु शून्यत्रयं तदूर्ध्वं चतुर्थमित्यर्थः । अथवा आदावंते च त्रयं त्रयं त्यक्त्वा मध्यस्थे अर्धचंद्रादिव्यापिकांतषट्के एकैकव्यवधानेन शून्यत्रयं तत्परे चतुर्थमिति अर्धचंद्रनादशक्तिषु त्रीणि शून्यानि । व्यापिकायां महाशून्यमिति वार्थः स्पष्टं प्रतीयते । तथापि । "शून्यषट्कं सुरेशानि अवस्थापंचकं पुनः । विषुवत्सस्वरूपं च भावयन्मनसा जपेत्" । इत्युपक्रमविरोधादन्यथार्थः । तथाहि । अग्न्यादि इति भिन्नं पदं शून्यत्रये अन्वेति । अंतशब्दश्चरमावयववाची । अर्थाच्चरमहल्लेखासंबंधिषु द्वादशस्ववयवेषु हकाराद्युन्मनांतेषु अग्न्यादिरेफमारभ्य शून्ययोः त्रयं शून्यत्रयं शून्यषट्कं विजानीयात् । तच्च न रेफादिसांतत्येन । किंत्वेकैकव्यवधानेनेत्यत आह । एकैकांतरितमिति । प्रथमशून्यस्य रेफस्थानीयत्वे कथिते व्यवधानमर्थाद्धकारेकारार्द्धचंद्रनादशक्तिसमनाभिः षड्भिरिति सिध्यति । तदेवाह । त्रींस्त्रीनिति । द्विगुणितान् त्रीन् त्यक्त्वेत्यर्थः ।

शून्यत्रयात् शून्ययोस्त्रयस्य तत् षट्कस्येत्यर्थः । सुपांसुपोऽङ स आदावनिर्द्धारणे षष्ठी । तेषां मध्ये परे चरमे उन्मन्यां महाशून्यमिति । एतद्विभावनस्य परमरहस्यत्वादित्थं क्लेशेनोक्तिरित्यन्वयितव्यम् ॥

क्रमात् प्राप्तानि सप्त विषुवंत्याह ।

प्राणात्ममानसानां संयोगः प्राणविषुवाख्यः ॥४३॥

अकारात्मकवायुः प्राणः । आत्मनश्च प्राणाः मनश्चेत्येतेषामैक्यं-प्राणविपुवसंज्ञामिति केचित् । यथाश्रुतमन्ये ॥ ४३ ॥

मंत्रविषुवमाह ।

प्राथमिककूटनादेत्वनाहताद् ब्रह्मरंध्रांते । व्यष्टि-समष्टिविभेदात् बीजचतुष्कस्य च स्वस्य ॥ ४४ ॥ ऐक्येन नादमयता विभावनं मंत्रविषुवाख्यं ॥

प्राथमिककूटनादे बीजचतुष्कस्य ऐक्यं । स्वस्यात्मनस्तु आधारोत्थितनादेन सहैक्यं । न प्राथमिकेनानाहतादारब्धेन सह । "आधारोत्थितनादे तु लीनं बुध्वात्मरूपकं । संयोगेन वियोगेन मंत्राणीनां महेश्वरि । अनाहताद्याधारांतं नादात्मत्वे(न)विचिंतनं । विषुवं"-इति कादिमतीयवचनात् । संयोगेन समष्ट्या । आधारांतादित्यर्थक आङ्प्रश्लेषे तु सर्वं सुस्थं ।

नाडीविषुवमाह ॥

आधारोत्थितनादस्योच्चारात् ब्रह्मरंध्रांतम्॥ ४५ ।
षट्चक्राणां ग्रंथीन् द्वादशभिंदन् सुषुम्नयैव पथा
नाडीनादार्णानां संयोगोनाडिकाविषुवम् ॥ ४६

मूलाधारादिचक्रषट्कस्याप्यधऊर्ध्वं चैकैकाग्रंथिरिति द्वादशग्रंथयः । तत् भेदनमार्गेणैव सुषुम्नानाडीमूलाधारात् ब्रह्मरंध्रं व्याप्नोति तेनैव मार्गेण नादस्य वर्णपंङ्क्तेश्च नाडीसंयुक्तत्वेन भावनयोच्चार नाडीविषुवमित्यर्थः ॥ ४६ ॥

प्रशांतविषुवमाह ।

रेफे कामकलार्णे हार्दकलायां च बिंद्वादौ ।
नादांतावधिनादः सूक्ष्मतरो जायते तत्र ॥४७॥
शक्तेर्मध्ये तल्लयचिंतनमुदितं प्रशांतविषुवाख्यम्।

त्रितीयकूटस्थरेफादिषु सप्तस्थानेषु आधारादारब्धस्य नादस्य तत्र सूक्ष्म(तर)ता दशा । अभिघातादुत्तरोत्तरक्षणेषु कांस्यताल ध्वनिवत् । तस्य शक्तौ लयो भाव्य इत्यर्थः ॥

शक्तिविषुवमाह ।

शक्त्यंतर्गतनादं समनायां भावयेल्लीनम् ॥४८॥
शक्तिस्थानादूर्ध्वं पुनरप्युज्जीवितस्य नादस्य ।

सूक्ष्मतमस्य व्यापिकामुल्लंघ्य समनायां लयः शक्तिविषुवमित्यर्थः ॥ समनोर्ध्वं पुनरुज्जीवितस्यात्यंतं सूक्ष्मतमस्य नादस्योन्मन्यां लयः कालविषुवमित्याह ।

समनागतमुन्मन्यामेते द्वे शक्तिकालविषुवाख्ये ॥

तत्वविषुवमाह ॥

श्रीविद्याकूटावयवेषु ककारादिषून्मनांतेषु ॥४९॥
अकुलादिकोन्मनातप्रदेशसंस्थेषु कमलेषु ।
अध्युष्टनिमेषोत्तरसप्तदशाधिकशतत्रयत्रुटिभिः ५०
उच्चरिते नादे सति तस्यांते तत्ववेदनं भवति ।
तदिदं चैतन्याभिव्यक्तिनिदानं तु तत्वविषु-
वाख्यम् ॥ ५१ ॥

उक्तेषु द्वात्रिंशत् पद्मेष्वधस्तनद्वयं चरमं चाकुलपद्मानि । शेषाणि कुलपद्मानि । तेषु यद्यपि मूलाधाराख्यात् कुलपद्मादेव

विद्याक्षराणां आरंभः तथापि चक्रराजस्य सकलाद्वयभावनाय
अधस्तनसहस्रदलकमलमारभ्यैवाकुले विषुसंज्ञे चेत्यादिना चतुश्श
त्यामुक्तत्वाच्चक्रविद्ययोरभेदेन श्रीविद्याया अपि तत आरंभोऽति
स्तंत्रेषु । अध्युष्टं सार्द्धत्रयंनिमेषो लोचनस्पंदकालः । तस्य त्रिश
हस्रतमोंशः त्रुटिः । "स्वस्थे नरे समासीने यावत् स्पंदति लोचनं
तस्य त्रिंशत्तमो भागस्तत् परः परिकीर्तितः । तत्परस्य शतांशस्
त्रुटिरीत्याभिधीयते" इति वचनात् । एवंच (१०८१७) अयुते
त्तराष्टशतोत्तरसप्तदशत्रुटिपर्यंतं विद्यावयवस्थानसंलग्नतापूर्वकं नादो
च्चारणे कृते सति तत्वस्य स्वसंविदभेदस्य बोधो भवति तदिद
मुच्चारणं तत्वविषुवं ॥ ५१ ॥

उपसंहारपूर्वकं जपं लक्षयति ॥

एवमवस्थाशून्ये विषुवच्चक्राणि पंचषट्सप्त ।
नवच मनोरर्थांश्च स्मरतोर्णोच्चारणंतु जपः ॥५२॥

अवस्थादिचतुष्टये संख्याचतुष्टयस्य क्रमादन्वयः । नादत्रयस्
चक्रत्रयात्मकत्वभावनं प्रागुक्तं । चक्रसंकेते तु अन्यदपि त्रयमुक्तं
चक्रभावनं त्रिविधं । सकलं निष्कलं सकलनिष्कलं चेति । अकुल
सहस्रारं मूलाधारादि पंचकं सूक्ष्मजिह्वाभ्रूमध्यं बिंदुस्थानं चे
नवसुस्थानेषु त्रैलोक्यमोहनादिचक्रनवकभावनं सकलं बिन्द्वाद्युन्

पर्यन्तं तद्भावनं द्वितीयं महाबिंदावेव तद्भावनं त्रितीयमिति। मनोर्मन्त्रस्यार्थाननुसंदधानस्य विद्याया अवर्णानामक्षराणां अष्टपंचाशतो मध्ये आद्यकूटद्वितीयकूटबिंद्वादिनवकद्वयप्रहाणेनावशिष्टानां चत्वारिंशदक्षराणामुच्चारणं जपः जपपदवाच्यमित्यर्थः ॥ ५२ ॥

भास्कररायेण गुरोः करुणावशतस्समुन्मनीमिषिते। वरिवस्यातिरहस्ये पूर्वांशः पूर्णतामगमत् ॥ ५३ ॥

इति श्रीनृसिंहानंदनाथचरणाराधकेन भास्कररायनाम्नातु भासुरानंदनाथेनोन्मनीकृते वरिवस्यारहस्ये तत्प्रकाशे च प्रथमांशः

हृन्मध्यरूपनिरुपाधिकसंविद्रूपकामेश्वराङ्कनिलयायै
सच्चिदानन्दब्रह्मात्मने परदेवतायै ललितायै
श्रीमहात्रिपुरसुन्दर्यै नमः।

वरिवस्यारहस्ये

सव्याख्याने द्वितीयोंशः ।

॥ श्रीरस्तु ॥ गुरुभ्योनमः ॥

अर्थज्ञानमावश्यकमित्याह ॥

नार्थज्ञानविहीनं शब्दस्योच्चारणं फलति ।
भस्मनि वह्निविहीने न प्रक्षिप्तं हविर्ज्वलति ॥१॥
अर्थमजानानानां नानाविधशब्दमात्रपाठवताम्
उपमेयश्चक्रीवान्मलयजभारस्य वोढेव ॥ २ ॥
पुरुषार्थानिच्छद्भिः पुरुषैरर्थाः परिज्ञेयाः ।
अर्थानादरभाजां नैवार्थाः प्रत्युतानर्थाः ॥ ३ ॥

एतेनार्थज्ञानस्य नित्यत्वमुक्तं भवति । तेचार्थाः तंत्रोपनिषद्भे-
थभेदेन नानाविधश्शिवेनोक्ताः । तांश्च संजिघृक्षुः उद्दिशति ।

अथातः पूर्णगायत्र्याः प्रतिपाद्यार्थ आदिमः ।
भावार्थस्संप्रदायार्थो निगर्भार्थस्तुरीयकः ॥ ४ ॥

कौलिकार्थो रहस्यार्थो महातत्त्वार्थ एव च ।
नामार्थश्शब्दरूपार्थश्चार्थो नामैकदेशगः ॥ ५ ॥
शाक्तार्थस्सामरस्यार्थः समस्तसगुणार्थकौ ।
महावाक्यार्थ इत्यर्थाः पंचदश्याः स्वसंमिताः ॥६॥

पूर्णगायत्र्याश्चतुर्थचरणसहितायाः । स्वे आत्मीया वर्णास्तैस्संमिताः स्वसंख्यासमानसंख्याकाः । पंचदशेति यावत् ॥ ६ ॥

त्रिपुरोपनिषदि प्रतिपादितं गायत्र्यर्थमाह ।

कामयते स ककारः कामो ब्रह्मैव तत्पदस्यार्थः ।
सवितुर्वरेण्यमिति वै सवितुः श्रेष्ठं द्वितीयवर्णार्थः ॥ ७ ॥
सर्वांतर्यामिदधद्भर्गोदेवस्य धीति तुर्यार्थः ।
पृथिवीमहीलकारास्त्रितीयतुर्याघ्रिबोधिका माया ॥ ८ ॥

"ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृतः" इति स्मृतेः "तदिति ब्रह्मशाश्वतं" इति श्रुतेश्च तत्पदार्थो ब्रह्म । तदेव च ककारार्थः ॥ "कं ब्रह्म" इति श्रुतेः । कामयते इत्यर्थो वा । कमे रौणादिको ढः । कामयते कामी जायते स एव निरंजनो कामत्वेनोज्जृंभते कामो-जायते तत् परिभाषया कामः ककारंवाप्नोति इति श्रुतेः । कामेश्वर

इति तु पर्यवसन्नं। सवितुरिति तु प्रत्ययार्थे। पुरा वत्सानामपाकर्तो-रित्यादि कल्पसूत्रीयप्रयोगवत्। प्राणिप्रसवकारणं। योनिरिति यावत्। तच्च नान्यसाधारणमित्यतो वरेण्यमिति। श्रेष्ठं भजनीयमित्यर्थः। तेन पदद्वयेनापि जगद्योनित्वं लब्धम्। तेन च कामेश्वरीत्यर्थः। स एव चार्थ एकारस्य। तस्य त्रिकोणत्वात्। तथा च श्रुतिः। "सवितुर्वरेण्य-मिति। षूञ् प्राणिप्रसवे सविता प्राणिनस्सूत" इत्युपक्रम्य "त्रिकोणा-शक्तिरेकारेण महाभागेन प्रसूते तस्मादेकार एव गृह्यत" इत्यादि। "यदेकादशमाधारं बीजं कोणत्रयात्मकं। ब्रह्मांडादि कटाहांतं जग-द्यापि दृश्यते" इति स्मृतेश्च। सर्वेति। सर्वान्तर्यामित्वं देवपदस्यार्थः। "देवो मध्यवर्ति" इति श्रुतेः। सोऽस्मि ॥ धत्त इति धीः। दधत् जगदाधार इत्यर्थः। "धरोधीत्येवं धार्यत" इति श्रुतेः। भर्ग इति स्पष्टार्थः। सर्वांतर्यामी सर्वाधारः शिव इति पर्यवसन्नं। ईकारस्याप्ये-तावानर्थः। भर्गोदेवस्येत्याद्युपक्रम्य तुरीयमक्षरं सर्वान्तर्भूतं। तुरी-याक्षरं पदानां मध्यवर्तित्वेन व्याख्यातं। "तस्माद्भर्गो देवस्य धीत्येवमी-कार" इति श्रुतेः। तुर्यार्थः मंत्रे तु त्रितीयस्यापि मातृकाक्रमे तुरीय-त्वादीकारस्यार्थ इत्यर्थः। मही पृथ्वी महत्वात् काठिन्याच्च। पंचमहा भूतानामुपलक्षणमेतत्। मृद्घट इतिवदेकविभक्तिमत्वसामानाधिकर-ण्यस्य तदात्मना परिणतत्वं। अयमेव च पृथ्वीबीजस्य लकारस्यार्थः। "महीहास्यव्याख्यान" मित्युपक्रम्य "ससागरं सकानन" मित्यादिना "भूमंडलं प्रतीयात्भूमंडलमेवोक्तं लकारेणे" ति श्रुतेः। त्रितीयेति।

गायत्र्याः त्रितीयाङ्घ्रिर्द्धियो यो नः प्रचोदयादिति । अस्मदादीनां धियो ध्यानादिरहिते वस्तुनि निष्प्रपंचे विषये प्रेरयतीत्यर्थः । परतत्वविषयकज्ञानजनक इति यावत् । तुरीयांघ्रिः परो रजसे सावदोमिति । रजसः परं परोरजसे । सोश्शे इत्यादेशः । रजोऽतीतं निर्मलमिति निर्गुणमिति वार्थः । न पुनः पर इत्यत्र भिन्नपदत्वभ्रमः कार्यः । "सुब्रह्मण्यानिगदे परो रजास्ते पंचमः पाद" इति प्रयोगात् । सावदोमित्यस्य सवदः अवदश्च यः प्रणवः । वक्तुं शक्यो वक्तुमशक्यश्चेत्यर्थः । शब्दैश्शक्तिमर्यादया न बोध्यः । शक्यतावच्छेदकधर्ममात्रस्य परतत्वे विरहात् । लक्षणया तु बोध्यः । सत्यज्ञानादिपदशक्यविशिष्टतादात्म्यसंबंधशालित्वात् । "यतो वाचो निवर्तंते" "वेदैश्च सर्वैरहमेव वेद्यः" इति श्रुतेः । "लक्ष्यार्था लक्षणागम्या" इत्यादि स्मृतेश्च । प्रणवार्थः परतत्वमकारोकारमकारैर्ब्रह्मविष्णुरुद्रात्मकं । एतावानप्यर्थो ह्रल्लेखायाः । हकारस्य ह्रदयमर्थः । तत्र ईंगतावित्यर्थः । इटकिटकटीगतावित्यत्र प्रश्लिष्टोयं धातुः । अत एव "ह्रदयागारवासिनी ह्रल्लेखा" इति श्रुतिः । एवं चायमर्थो गायत्र्याः प्रथमकूटस्य च संपन्नः । सर्वजगत्सिसृक्षारूपकामनावान्कामेश्वरः जगत्कारणरूपा कामेश्वरी शिवस्सर्वांतर्यामी सर्वाधारः पंचमहाभूताद्यात्मना परिणतः । परवस्तुमात्रविषयकनिर्विकल्पकज्ञानजनको ,निरंजनो निर्गुणो वेदैर्लक्षणया गम्यः शक्त्यात्वगम्यो ब्रह्मविष्णुरुद्रात्मा परतत्वमिति ॥ ८ ॥

द्वितीयत्रितीयकूटयोरर्थमाह ।

त्रिपदी त्रिवर्णबोध्या तुर्यस्तदुपरि षडक्षरी गमकः ।
अथ तार्तीये वर्णद्वितयं त्रिपदी षडक्षरी गमकम् ॥ ९ ॥
कूटद्वितये शेषं पूर्ववदुन्नेयमिति तु विद्यायाः ।
गायत्र्यर्थस्त्रिपुरोपनिषदि कथितस्तथैव भागवते ॥ १० ॥

त्रिपदी गायत्रीस्थं पदत्रयं विद्याद्वितीयकूटस्थवर्णत्रयेण बोध्यं । त्र्यवयवका वर्णास्त्रिवर्णाः । त्रिगुणसचिवः नवरसरुचिरा-मित्यादिवत्समासः । तत्पदार्थो ब्रह्मशिववाची हकारस्यार्थः । तदिति परमात्मेत्यारभ्य हकाराक्षरं शिवरूपमित्याद्युक्त्वा अंते-तत्पदव्यावृत्तिमादाय शक्तिन्दर्शयतीति श्रुतेः । सकारस्य सवितार्थः । ककारस्य वरेण्यमर्थः । तुर्यः हकारः । तदुपरि पद-त्रयोपरि विद्यमाना या षडक्षरी भर्गो देवस्य धीति तदर्थबो-धकः । त्रितीयकूटे वर्णद्वितयं (स) संकेतिताभ्यां धीत्यंतगायत्र्या अर्थः प्रतिपाद्यः । उभयत्रापि लकारह्ल्लेखाभ्यां पंचमहाभू-ताद्यात्मनेत्यादिरर्थ इत्याह । कूटद्वितय इति । एवं चतुश्चरणाया गायत्र्यास्त्रिरावृत्ताया अर्थस्य प्रतिपादकं कूटत्रितयमिति । भागवत इति। भगवत्या इदं भागवतं भगवतीपुराण इत्यर्थः। तस्य हि पुरा-णस्यादिमः श्लोकः त्रिचरणः पठ्यते । यथा “ सर्वचैतन्यरूपां तां

आद्यां विद्यां च धीमहि। बुद्धिं या नः प्रचोदयात्" इति। अत्र ह्याद्याया श्रीविद्याया एव ब्रह्मरूपत्वं गायत्र्यादि प्रतिपाद्यत्वं विद्याप्रतिपाद्यत्वादिकं च तदर्थव्याख्यानदर्शिनां स्पष्टं। वस्तुतस्तु "हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्याच समारंभस्तद्वै भागवतं विदुः" इति लक्षणानुगत्येदमेव भागवतपदवाच्यं न पुनर्नन्माद्यस्य यतोन्वयादित्यादिकं ॥ १० ॥

अथ योगिनीहृदयोक्तान् भावार्थादीन् षडर्थानाह।

वामेच्छे ब्रह्मभारत्यौ ज्येष्ठा ज्ञाने हरिक्षिती।
रौद्रीक्रिये शिवापर्णे इत्येतन्मिथुनत्रयम्॥११॥
त्रिभिः कूटैः क्रमाद्वाच्यमोकारत्रितये न तु।
एतत्त्रयसमष्ट्यात्मवाच्यं शांतांबिकात्मकम्॥१२॥

प्रकाशस्यांशभूता वामा ज्येष्ठा रौद्रः शक्तयस्तिस्त्रो ब्रह्मविष्णुरुद्राः पुंरूपाः। तत्समष्टिश्शान्तात्मिकाशक्तिस्तुरीया। विमर्शस्यांशभूता इच्छा ज्ञानक्रिया शक्तयस्तिस्त्रस्तद्भार्यात्वेन प्रसिद्धा भारती पृथिवी रुद्राण्यः स्त्रीरूपाः। तत्समष्टिरंबिकात्मिकाशक्तिस्तुरीया। अत्र च प्रथममिथुनत्रयमीकारविनिर्मुक्तकूटत्रयस्य क्रमेणार्थः। ईकाराणां तु तुरीयमिथुनमर्थः। वक्ष्यमाणे शाक्तार्थेत्वेकैकस्मिन्नपि कूटे रेफान्तवर्णषट्कस्य मिथुनत्रयमर्थ इति तस्मात् भेदः। तदुक्तं योगिनी-

हृदये । "अक्षरार्थोहि भावार्थः केवलः परमेश्वरि । योगिनीभिस्सदा वीरैर्वीरेन्द्रैस्सर्वदा प्रिये ॥ शिवशक्तिसमायोगाज्जनितो मंत्रराजकः" इति ॥ व्याख्यातं चेदं अमृतानंदयोगिभिः । भारत्यादिभिर्योगिनीभिर्वीरेन्द्रैः कूटत्रयवाच्यभूतैश्शिवशक्तिसमष्टिरूपमिथुनेनेकारवाच्यभूतेन चोपलक्षितो मंत्रराजो वीरैर्जनितो भावित इत्यर्थ इति । वस्तुतस्तु सकलादिनामकास्त्रिविधा उपासका वक्ष्यमाणा वीरपदेनोच्यंते । "अहमिप्रलयं कुर्वन्निदमःप्रतियोगिनः । पराक्रमपरो भुङ्क्ते स्वात्मानमशिवापहं" इत्यादिना परापंचशिकायामन्यत्र च वीरपदस्य साधकपरत्वेनैन निर्वचनात् । अत एव ब्रह्मादीनामुपासकश्रेष्ठत्वात् धीरेन्द्रपदवाच्यत्वं संगच्छते । एवं च तिस्रोभारत्याद्यायोगिन्यस्त्रयस्सकलाद्यास्साधकास्त्रयो ब्रह्माद्या वीरेन्द्राः कूटत्रयेण हृल्लेखाविनिर्मुक्तेन क्रमात्प्रतिपाद्याः । हृल्लेखानां तु शिवशक्तिसामरस्यात्मकं चतुर्थमिथुनमर्थः । "ह्रींकार उभयात्मक" इति वचनात् । वाच्यभूतैर्योगिन्यादिभिर्जनितो युक्तो मंत्र इत्यर्थः ॥ १२ ॥

एतमेवार्थं मनसि निधायाह ।

यद्वागीस्सकलब्रह्मप्रभृतीनां त्रयं त्रयम् । त्रिकूटवाच्यं मायायास्तुरीयंमिथुनं मतम् ॥ १३ ॥

अथवा वीरपदं योगिनीनामेव विशेषणमतल्लिङ्गं । अत एव ब्रह्मादीनां वीरपतिवाचकवीरेन्द्रपदेन निर्देशः । योगिनीवीरेन्द्रपदाभ्यां

च शाक्तार्थे वक्ष्यमाणानां षण्णामक्षराणां भारत्यादिवाचकानां परामर्शः। शिवशक्तिसमायोगपदेन कामकलायाः परामर्शः। तस्यामुभययोगस्यानुपदं वक्ष्यमाणत्वात्। एवं सप्तभिरक्षरैस्त्रिरावृत्तैर्म्मंत्रराजो जनितः प्रादुर्भूत इत्यर्थः। एतत्सप्तकपरिणामत्वान्मंत्रोपि तदात्मकः। (द्र) प्रसारपरमार्थ(त्म)न्यायादिति भावः। न च मंत्रस्योत्पत्त्यङ्गीकारेऽनादित्वभंगः। निर्विशेषब्रह्मातिरिक्तस्य निखिलस्यापि सृष्टिप्रतिपादकशास्त्रप्रामाण्याज्जन्यत्वस्येष्टत्वेन सविशेषशक्तिवदजन्यत्वरूपानादित्वस्यानभिमतत्वात्। प्रवाहानादित्वं तु जन्यत्वाङ्गीकारेपि नानुपपन्नं। कार्यमात्रस्य स्थूलसूक्ष्मरूपद्वयस्वीकारेणोत्पत्तेः पूर्वमपि कारणांतः सूक्ष्मरूपेणावस्थानस्य सत्कार्यवादिभिरस्माभिरङ्गीकारेणानादित्वप्रतिपादकवचनानां तत्परत्वेनाप्युपपत्तेश्च। प्रथम पक्षद्वये तु जनितपदादेरर्थो न स्वरसः। अत एवोत्तरग्रंथे भारत्यादि सप्तकसमष्टिरूपायाः परदेवताया मंत्राभेदप्रतिपादनं संगच्छते। वाचकाक्षरसमष्ट्यात्मकमंत्रस्य वाच्यार्थसमष्ट्यात्मकपरदेवताऽभेदस्य वाच्यवाचकयोरभेदवादिनामस्माकं न्यायसिद्धत्वेन संदर्भशुद्धेः। यथा "तन्मयीं परमानंदनन्दितां स्पन्दरूपिणीं। निसर्गसुन्दरीं देवीं ज्ञात्वा स्वैरमुपासते। शिवशक्त्यात्मसंघट्टरूपे ब्रह्मणि शाश्वते। तत्प्रथाप्रसराश्लेषशालिन्यैन्द्रोपलक्षिते। ज्ञातुर्ज्ञानमयाकारकरणान्मंत्ररूपिणीं। तेषां समष्टिरूपेण पराशक्तिस्तु मातृकेति"। तन्मयीं मंत्रराजाभिन्नां। आनंदमयश्चिन्मय इतिवदभेदे मयट्। अन्ये तु तुरीयकूट-

स्यार्थमाहुः। तन्मयीमिति। चतुर्मिथुनवाचकत्रिबीजसमष्टिरूपमन्त्रवाच्यामित्यर्थः इति व्याचक्षते। तन्नातीव संदर्भशुद्धं। वाच्यार्थे मयडभावश्चेत्युपेक्ष्यं। स्पंदः षट् त्रिंशत्तत्वात्मना परिणामः तद्रूपिणीं तदभिन्नां। एतेन देवताऽभिन्नविश्वस्यापिमंत्राभेदस्सूचितः। अव्याकृतनामरूपप्रपंचस्योत्पत्युन्मुखतैव स्पंदोन्मेषव्याकरणादिशब्दैर्व्यवह्रियते। "नामरूपे व्याकरवाणि" "न खलु कुशलस्स्पंदितुमपि" इत्यादौ। तेनाव्याकृतनामरूपजगत एव स्पंद इति प्रायेण तंत्रेषुव्यवहारः। इत्थं मंत्रदेवता जगतामभेदमनुसंदधानो मंत्रं जपेदिति विधत्ते। स्वैरमुपासते इति। पंचमोयं लकारो लिङर्थे। मुखं व्यादायस्वपतीतिवत् समानकालिकत्वेपि ज्ञात्वेत्यत्र क्त्वा प्रत्ययः। एवं देवतायां मंत्राभेदं युक्तिभिः प्रतिपाद्य मंत्रपदस्यावयवशक्तिरपि समस्तीति प्रदर्शयति शिवेत्यादि सार्धश्लोकेन। शिवशक्त्यात्मनोः संघट्टस्सामरस्यं तद्रूपे। शाश्वते अनादिनिधने। तस्य प्रथायाः पृथुत्वेन प्रसरो जगद्रूपस्तदाश्लेषशालिन्यपि ऐन्द्रेण जगदैश्वर्येण का केनवोपलक्षिते नतु विशिष्टे विषयत्वं सप्तम्यर्थः। तथा च सत्यत्वज्ञानत्वाद्युपलक्षित शुद्धब्रह्मैकविषयकनिर्विकल्पकज्ञानवतस्साधकपुंगतस्य ज्ञानमयः स्वसंविद्रूपो ब्रह्मभावो य आकारः तत्करणान्मन्तारमुक्तज्ञानरूपमननशालिनं त्रायते भयजनक द्वितीयपदार्थमात्रनिरासादिति मंत्रपदावयवार्थशालिनीमिति विद्ध्यंतर्गतदेवीपदस्य विशेषणम्। मन्त्र इति पदस्य देव्यामुपपदत्वमुपपाद्य तत्पदार्थभूतं

पंचदश्यभिन्नत्वं संदिग्धाकारेण प्रतिज्ञातपूर्वमपि हेतुना दृढयति । तेषामिति । तु शब्दोऽत्र हेत्वर्थः । यतो भारत्यादीनां समष्टिरूपेणोपलक्षिता माता ततस्तस्यान्तद्वाचकाक्षरसमष्ट्यात्मकविद्याऽभेद उपपद्यत इति भावः । अथवा मंत्रपदस्यावयव शक्त्या प्रवृत्तिमुपपाद्य समुदायशक्त्यापि तामुपपादयितुम्मन्त्रराजपदशक्यतावच्छेदकं भारत्यादिसप्तकसमष्टित्वं परदेवतायामाह । तेषामिति । समष्टीति भावप्रधानो निर्देशः । समष्टित्वेन शक्यतावच्छेदकरूपेण युक्ता यतः परदेवता ततो रूढ्यापि मंत्रराजपदवाच्यत्वं युक्तं । तेन च तयोरभेदोपि युज्यत इति भावः ॥ १३ ॥

अमुमेवार्थं सुनिष्कृष्टं श्लोकतो निबध्नाति ।

वामेच्छाद्याष्षडीकार इति सप्तभिरक्षरैः । त्रिरा-
वृत्तैरियं विद्या संजाता तेन तन्मयी ॥ १४ ॥
वामादि सप्तशक्तीनां समष्टिः परदेवता । षट्त्रिं-
शत्तत्वरूपास्मान्मात्रयापि न भिद्यते ॥१५॥

अस्मात्तन्मन्त्रात् मात्रयापि न भिद्यते लेशेनापि न भिद्यते । मंत्रे त्रितीयवर्णस्य ज्येष्ठाशक्तिवाचकत्वेन वामादिषट्कान्तःपातित्वेनावशिष्टानां हृल्लेखास्थानामेव कामकलानामीकारपदेन परामर्शान्नत्रिरावृत्तेरितिसंख्याविरोधः । न च शाक्तार्थेन पौनरुक्त्यं । तत्र

वामादि षट्कं कामकलायामभिन्नमिति वाक्यार्थः । अत्र तु वामा
कामकलान्तसप्तकाभिन्नो मन्त्रष्षट्त्रिंशत्तत्वाभिन्नमात्राभिन्न इत्यर्थ इ
महतो (हेतोः) भेदात् ॥ अथवा शिवशक्तिसमायोगसमष्टिजन्यत्वा
न्मंत्रराजः स्पन्दश्च तद्व्यष्टिरूपौ शिवशक्तिमयौ । तेन जगन्मंत्रदेवी
नामभेद इति भावनं भावार्थः । अतएवोपसंहृतं योगिनीहृदये
"चलत्तासंस्थितस्य तु । धर्माधर्मस्य वाच्यस्य विषामृतमयस्य च
वाचकाक्षरसंयुक्तैः कथिता विश्वरूपिणी । तेषां समष्टिरूपेण परा
शक्तिं तु मातृकाम् । कूटत्रयात्मिकान्देवीं समष्टिव्यष्टिरूपिणीं । आद्य
शक्तिं भावयंतो भावार्थ इति मन्यते" इति । पराहंतेत्यादिभावा
र्थकत्वतलादिवाच्यत्वाद्धर्म्मःशक्तिः । निर्द्धर्म्मकत्वादधर्मःशिवः
स्पंदजननं प्रति शक्तिवहिर्भूतस्य शिवस्य अक्षमत्वादन्वयव्यतिरेक
योराचार्यभगवत्पादैस्सौन्दर्यलहर्यां प्रथमश्लोके प्रदर्शितत्वाच्च शक्ते
कारणतावच्छेदकत्वं कारणत्वं भवचक्रात्मकस्पंदं प्रतिस्वीकार्यं । तेन
जननमरणादिक्लेशमयसंसारजनकत्वाद्विषं शक्तिः । तद्विनिर्मोका-
दमृतं शिवः । तदुभयस्य वाच्यस्य वाचके ये अक्षरे वक्ष्यमा-
णरीत्या हकाररेफरूपेताभ्यां व्यस्ताभ्यां तदुभयसमावेशरूपकाम-
कलाक्षरेण चास्य चलत्ता संस्थितस्य नश्वरतायुक्तस्य जगतः
प्रकृतत्वान्मन्त्रराजस्य च सम्यक्परिणामपरिणामिभावेन युक्तैस्सं-
बंधादेषा विद्या विश्वरूपिणी कथिता । एकाकारोत्पन्नयोरभेदा-
दिति शिवशक्तिसामरस्य रूपस्य परा शक्तिं जगदंबादिपद-

वाच्यस्य कारणस्य कार्याभ्यां विश्वविद्याभ्याममेदं सूचयन्त्रयाणा-
मभेदमुपसंहरति तेषामित्यादिना इति तदर्थः । अस्मिन्पक्षे
योगिन्यादिभिर्भावित इति शेषपूरणेनोपक्रमश्लोकार्थो वर्णनीयः ।
भावार्थस्वरूपं तु शिवशक्तिसमायोगजन्यत्वादिकमात्रम् । न पुनर्यो-
गिन्यादेर्जनककोटौ निवेशः । अक्षरार्थत्वं च तादृशाक्षरद्वय-
जन्यत्वादेवेति दिक् । अत्रेदमवसेयम् । इयं सृष्टिः परब्रह्मपरिणाम
इति पूर्वमुक्ता । सा च सृष्टिर्द्वेधा अर्थमयी शब्दमयी चेति । चक्रमयी
देहमयीचेति सृष्टिद्वयं तु बालक्रीडनकार्थे स्थूलगृहसमानाका-
रत्वेन सूक्ष्मगृहनिर्माणतुल्यमर्थसृष्टावेवान्तर्गतम् । न पुनरत्यन्तं
भिद्यते । सा च द्विविधापि सृष्टिस्समकालीनोत्पत्तिका समकाली-
नाभिवृद्धिशालिनी च । यथा बीजादंकुरतच्छाये । तत्र च छायादर्शनेन
वृक्षानुमितिरनुभवसिद्धा । सा च छायायां वृक्षसमानाकारत्वं वृक्षा-
विना भावंच विनानुपपन्नेति तद्द्वयमपि तत्रकल्प्यं । प्रत्यक्षसंवाद-
षिषयश्च । तद्वच्छब्दः सर्वोप्यर्थाविनाभूतः । अर्थज्ञानजनक-
ज्ञानविषयत्वात् । "वागर्थाविवसंपृक्ता" वित्याद्यभियुक्तोक्तेश्च ।
तथार्थसमानाकारोपि । तथाहि । यावन्तश्शब्दे अवयवास्तावन्त
एवार्थे तद्ज्ञानेचाभ्युपेयाः । चैत्रस्तंडुलं पचतीत्यत्र चैत्रपदं सुप्र-
त्ययः तंडुलपदं अं प्रत्ययः पच् धातुः तिप् प्रत्ययश्चेति षडवय-
वात्मकस्य शब्देसमूहस्य चैत्रः कर्तृत्वं तंडुलः कर्मत्वं तेजस्संयोगः
कृतिश्चेति विशकलिताः षडार्थाः । तेषां च परस्परसमभिव्याहा-

रस्य तु परस्परसंबन्धविशेषोर्थः । तत्तत्पदार्थ विशिष्टाभाव
वाक्यार्थ इति मीमांसकाः तत्तादितरव्यावृत्तिर्वाक्यार्थ इत्यपि केचित्
एवं तद्ज्ञानमपि षट् पदार्थान् तत्संबन्धादींश्च विषयीकुर्वत् तत
मानाकारं भवति । अन्यथा ज्ञानानां परस्परवैलक्षण्यानुपपत्तेः
अन्तःकरणपरिणामविशेषरूपे ज्ञाने तत्तदाकारत्वेन परिण
त्वकल्पनसंभवाच्च । अत एव चैत्रस्तण्डुलंपचतीत्याकारकं ज्ञानमि
त्येव सकलतान्त्रिकाणां निराकारवादिनामपि व्यवहारः । अनयो
सृष्टयोर्ज्ञानजनकन्तु मन एव । तच्च शब्दं श्रोत्रेन्द्रियद्वारैवगृह्णाति
अर्थं तु कंचन साक्षात् । कंचन चक्षुरादि द्वारेति विशेषः
ते च द्वे अपि सृष्टीस्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदात्प्रातिस्विकं चतु
र्विधे । श्रोत्रमनसोस्त्वर्थान्तः पातित्वादेव चातुर्विध्यं । एवं
स्थूलश्रोत्रेण स्थूलशब्दश्रवणात् स्थूलार्थस्य स्थूलमनसा ज्ञानं
सूक्ष्मश्रोत्रेण सूक्ष्मशब्दश्रवणात् सूक्ष्मार्थस्य सूक्ष्ममनसाज्ञानमित्या
द्रष्टव्यम् । श्रोत्रमनसोस्सूक्ष्मत्वादिकन्तु शास्त्राभ्यासयोगाभ्यासा
पाटवजन्यम् । तदेतद्योगशास्त्रे "निर्विचारवैशारद्ये अध्यात्म
प्रसार" इति सूत्रे "ऋतंभरा तत्र प्रज्ञा" इति सूत्रेच स्पष्टं । अत ए
(ऋग्वेद) श्रुतिः । "चत्वारिवाक्परिमितापदानि तानि विदुर्ब्राह्मणा
मनीषिणः । गुहा त्रीणि निहितानेंगयंति तुरीयं वाचो मनुष्य
वदंति" इति । तेषांच नामानि वैखरी मध्यमा पश्यंती परेति । श्रुत
तुरीयपदस्य वैखर्यर्थः । सृष्टिक्रमस्यैव तत्राभिप्रेतत्वात् । एतच्छन्द

चतुष्टयवाच्या अपि तथा तथोन्नेयाः। तथाहि। मस्तकाद्यवयवैरिन्द्रि-
प्राणदशकशालित्वं स्थूलजगदादि व्यक्तौ। तथा सद्योजातशिशा-
वपि पिपीलिकादावपीत्यविवादं। इयांस्तु विशेषः। स्थूला अवयवाः
स्थूले अल्पेत्वल्पे एवंच वैखरीरूपघटपदवाच्यापेक्षया मध्यमादि-
रूपघटपदैर्वाच्या घटायुक्तिभिरुन्नेयाः। ते च पदार्थास्संकोचमञ्चंतः
केचिदस्पष्टनिखिलावयवकाः। केचित्तु संकुचज्जलूकाकमठादिवद-
स्पष्टकिंचिदवयवकाः अवयवन्यूनाधिकभावेन परिमाणभेदेपि द्रव्या-
भेदस्य मीमांसकादिभिरंगीकारादिति यथायथमूहितव्यं। एतेषां
चतुर्णां वाचकानां चतुर्भ्यो वाच्येभ्यो भेदा अपि चत्वारः कल्पिताः
स्थूलादि रीत्या चतुर्विधा ज्ञेयाः। सृष्टिचतुष्टयस्यापि मूलभूतो
बिंदुः बीजस्थानापन्नः। तस्मादपि परतस्तुसूक्ष्मतमापेक्षया सूक्ष्म-
ममपि विशिष्यतद्वाचकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मेत्यादिपद-
निर्देश्यं परं ब्रह्मैव। तच्च प्रकाशैकाकारस्यार्थादत्यंतभिन्नस्य
शब्दब्रह्मेत्यादि पदनिर्देशविशेषस्याभावादनिर्देश्यं। “अग्राह्यम-
शब्दमस्पर्शामि” त्यादि निषिद्धविशेषणं। वस्तुतस्सृष्टिद्वयमूलभूतसू-
क्ष्मरूप विशेषात्मकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मेत्यादिपदनिर्देश्यं
परं ब्रह्मैव। तच्च प्रकाशैकस्वरूपं। घटस्स्फुरतिपटस्स्फुरतीत्यादि
प्रत्ययेन पदार्थमात्रे स्फुरणाख्यवस्तुविशेषणस्य तत्तदभिन्नस्यानुभव-
सिद्धत्वात्प्रकाशस्यापि स्फुरणमवश्यं वाच्यं। जनकत्वानुपपत्तेः
कामकलाविलासव्याख्यायां स्फुटतरमुपपादनात्। तेन शुद्धस्य शिवस्य

शुद्धायाः शक्तेर्वा जगत्कारणत्वं तत्र तंत्रोच्यमानं शिवशक्तिरू
स्योभयात्मन एव बोध्यं। तत्र प्रकाशस्त्वकारस्वरूपः। तद्वाच्यश्च
स्फुरत्तातु हकाररूपा तद्वाच्याच। तावेतावकारहकारौ परारू
सूक्ष्मतमौ प्रागुक्तौ। परादि सृष्टिमूलभूतस्य बीजस्थानीयस्य बिंदुवि
षस्य तु व्यक्ताव्यक्तविलक्षणौ वाचकौ। तस्यापि जनकस्य परब्रह्मण
केवलमव्यक्तावयवशून्यस्वरूपौ वाचकौ। तयोश्शून्यस्वरूपत्वा
"यतो वाचो निवर्तन्ते" इत्यादि (तै० उ० २-४) श्रुतिभिरवाच
तोक्तिः। वाच इति बहुवचनेन परादिचतुष्टयस्यैवं परामर्शात्। त
च स्मर्यते। "अहमित्येकमद्वैतं यत्प्रकाशात्मविभ्रमः। अकारस्स
वर्णाद्यः प्रकाशः परमः शिवः। हकारोन्त्यः कलारूपो वि
शाख्यः प्रकीर्तितः॥ अनयोस्सामरस्यं यत् परस्मिन्नहमिस्फुट"मिति त
"अक्षराणामकारोस्मि" (१०-३३) इति गीताच। "शून्याकार
द्विसर्गांतात् बिन्दुप्रस्पन्दसंविद"इति योगिनीहृदयं च। शून्याका
शून्यमात्रस्वरूपो यो विसर्गान्तः षोडशस्वरान्त्यः तस्माद्बिन्दु
शेष उत्पन्न इति तदर्थः। विसर्गस्याव्यक्तहकारतुल्यत्वेनाकारस्या
तत्र सत्वेन षोडशस्वरकीर्तनं प्रकृतं। तेनाकारहकारावेव शून्य
कारौ कीर्तितौ वेदितव्यौ। अत एव शून्यश्चासावकारश्चेति के
द्व्याख्याय विसर्गो हकारस्स एवान्ते यस्येति विग्रहप्रदर्शनपूर्व
हकारविशिष्टादकारादिति व्याचक्षते। तन्मते हकारे शून्यत्वला
दुर्घटः। अत्रायं सृष्टिक्रमः। यथाहि कश्चित्पुरुष उत्पत्स्यमानपुत्र

V. NAGAM AIYA, 3 JUIL 1901 PEISBOR

ध्यदृष्टवशादुत्पादेच्छाविशिष्टः स्वीयामुत्पादनशक्तिमवलोक्य स्वार्धः शरीरात्मिकायां भार्यायां स्वयमंतः प्रविशति शुक्लरूपेण । "पतिमेकादशं कृधि" । "आत्मा वै पुत्रनामासी"ति श्रुतेः । प्रविश्यमानस्य स्वाभिन्नत्वान् स्थूलतरभेदाक्रांतत्वाच्च नाभेदभानं । ततस्तस्य शुक्लस्यांतः शोणितबिन्दुरूपेण भार्या प्रविशति । तेन च सबिन्दुरुच्छूनो भवति । एष वटोदुंबरादि बीजस्थानीयः । तस्मादंकुरविशेषाद्युत्पत्तिक्रमेण कालान्तरे पुत्राद्युत्पत्तिरिति । यथावासूर्याभिमुख दर्पणे तदंतःप्रविष्टकिरणादुभयकिरणसंकलनरूपः तेजोबिन्दुविशेषः कुड्यादौ प्रादुर्भवति । तथा प्राण्यदृष्टवशात् स्वांतस्संहृताविश्वासिसृक्षया प्रकाशरूपं ब्रह्मस्वीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदंतस्तेजोरूपेण प्रविस्य शुक्लबिन्दुभावमयते । ततस्तं पिण्डं रक्तरूपाशक्तिः प्राविशति । तेन संमिश्रबिन्दुरुच्छूनो भवति । तत्र च हार्दकलारूपोप्येकः पदार्थविशेषो भवति । स पुनर्गुरुमुखादेवावगंतव्यो न पुनः पुस्तके लेख्यः । स च बिंदुः समष्टिरूपेणैकः स्फुटशिवशक्तिसामरस्यनामा "कामोरविरग्नीषोमात्मक" इत्यादि शब्दैर्व्यवह्रियते । व्यष्टिरूपेण द्वयं । तत्र शुक्रः इन्दुः रक्तोग्निरिति बिन्दूद्वयात्मकत्वाद्विसर्ग इति च व्यवह्रियते । अत एव च रवेरात्रावग्नावमायां चंद्रे च प्रवेशस्य श्रुत्यादिसिद्धत्वात् समष्टिबिन्दोः रवित्वं । एवं कामाख्यो बिन्दुर्विसर्गो हार्दकलाचेति त्र्यवयवक एकः पदार्थउणादिप्रत्याहारवत् कामकलेत्युच्यते ।

इदमेव च समस्तसृष्टिबीजं । अत एवाकारहकारयोर्मध्ये सर्वव
पाठः। ळकारस्य ळकाराद्भिन्नत्वात् क्षकारस्य कषयोगरूपत्वा
तद्बहिर्भावः शक्यः । एतन्मूलभूतं ब्रह्मतुरीयबिन्दुरित्युच्यते
तद्रूपाभ्यां शून्यस्वरूपाभ्यामकारहकाराभ्यामुत्पन्ना कामक
व्यक्ताव्यक्तविलक्षणाऽहं पदवाच्या । अकारहकारोभयात्मक
शिवशक्तिद्वयरूपत्वं चाहंपदस्य निष्कृष्टोर्थः। अत एव तज्जन्या
सूक्ष्मादिस्थूलांतानामखिलसृष्टीनामहंपदवाच्यत्वं । यथाद्युदुंबरप
वाच्यबीजाज्जनितानां परस्परविलक्षणानामपि पर्णकाष्ठकुसुमफ
क्रमीणां सर्वेषामुदुंबरत्वं । उदुंबरपर्णमुदुंबरक्रिमित्यादि व्य
हारात् । तथा च श्रुतयः । "ब्रह्मवा इदमग्र आसीत्
तदात्मानमेवावेदहं ब्रह्मास्मि" (१-४-१०) इति बृहदारण्यके
"त्वं वा अहमहं वै त्वमि" त्यैतरेयके "कस्त्वमित्यहमितिहोव
चत्वमेवेदं सर्वं तस्मादहमिति सर्वाभिधानम्" इति ता
पनीये। पाणिनिनाप्यस्मच्छब्दस्य सर्वनामतोक्ता । तत्रैवान्य
"तद्वा एतद्ब्रह्माद्वयमि" त्यादिना ब्रह्मस्वरूपमभिधाय तदुपास
पूर्णाहंभावभावनारूपां पश्यता "हंसस्सोहमि"त्यादिना विदधाति
तत्प्रकारस्त्वतिरहस्यत्वाद्गुरुचरणैकलभ्यः। उक्तं च कादिमते "
धानं योनिमुद्राया मंत्राणां वीर्ययोजनं। गुरोर्लक्षणमेतावदादिमान
तु वेदयेत् इति। आदिमोऽकारः अंत्यो हकारः तयोस्समाहारः अहं
बिन्दुलाभायैवेतरेतरयोगद्वंद्वपरित्यागेन समाहारद्वंद्वोक्तिः। छान्द

ग्येपि "अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोहमुत्तरतोऽहमेवेदंसर्वम्" इति (७-२५-१)। विरूपाक्षपंचाशिकायामपि। "स्वपरावभासनक्षम आत्मा विश्वस्य यः प्रकाशोऽसौ। अहमिति स एक उक्तोऽहंता स्थितिरीदृशी तस्ये" त्यादिपरस्सहस्रं वचनानि। एतादृशस्याहंपदार्थस्य यथाहमिति पदं वाचकं तथोत्तमपुरुषैकवचनमपि वाचकं। तस्यच परस्मैपदात्मनेपदभेदेन द्वैविध्येपि मिप इट श्चेकारत्वेनानुगमात् इत्वमेव शक्ततावच्छेदकं। "अन्यायोऽनेकंशब्दत्व" मितिन्यायात्। तस्य च धातुत्वेनोत्तमपुरुषत्वादिनावोपस्थितिः पदार्थस्मारकत्वे तन्त्रं। एर्णलादावपि लुप्तस्य स्मरणं। तदभावे शक्तिभ्रमात् बोध इत्यादि यथायथमूह्यं। तत्रचाकारहकारयोरवयवयोरदर्शनेपि शास्त्रप्रामाण्यात् सूक्ष्मरूपौ तौस्त इति स्वीकार्यं। तस्यैवच हार्दकलायोगे दीर्घतापि संपद्यत इति तुरीयस्वरस्य कामकलारूपत्वं मंत्ररहस्यविद्भिः प्रतिपाद्यते। तदुक्तं योगिनीहृदये। "मध्यबिन्दुविसर्गान्तस्समास्थानमये परे। कुटिलारूपके तस्याः प्रतिरूपं वियत्कले" इति। मध्यबिन्दुः कामाख्यः। तस्य तुरीयबिन्दुविसर्गमध्यपातित्वात्। समष्टेर्व्यष्टिमध्यएवान्तर्गतत्वाच्च। विसर्गो व्यष्टिरूपं बिन्दुद्वयं तयोर्मध्ये सम्यक् चैतन्यात्मना अवस्थानं। तन्मये तत्प्रधाने। परे चरमे अकारहकाररूपेऽक्षरे। मातृकाणां क्रमेण पाठे चरमत्वाद्धकारस्य। व्युत्क्रमपाठे त्वकारस्य चरमत्वात्। किञ्च इमे अक्षरे कुटिलारूपके। कुटिले अकुलकुले

कुण्डलिन्यौ तयो रूपान्तरे तावताकामविसर्गयोः किमायातमित्यत आह । तस्या इति। तयोः कुण्डलिन्योरित्यर्थः । वियत्पदेन शून्याकारत्वात्कामः प्रतिपाद्यते। कलापदेनच हार्दकलावत्वाद्विसर्गः। यतः कामविसर्गयोः कुण्डलिनी प्रतिबिंबरूपत्वं ततः कुण्डलिन्यभिन्नाकार-हकाररूपत्वं संभवतीति भावः इत्यस्य श्लोकस्य सांप्रदायिकी रहस्यव्याख्या।एवमकारहकारैकस्वरूपा कामकला। तद्भूते मन्त्रे विजातीयाक्षरवत्वान्यथानुपपत्त्यापि तयोर्गर्भे सूक्ष्मरूपेणान्येषां वर्णानामर्थसृष्टेश्चावस्थानं सिद्ध्यति । यथा वटबीजरूपसंपुटे पर्णकाष्ठादेः। किञ्च वटादिबीजानां स्फोटनैवांकुराद्युत्पत्तिरिति बीजस्य पूर्वार्धोत्तरार्धयोर्वियोग इत्यविवादं । तच्चार्धद्वयं महति वृक्षे कस्मिन्कस्मिन्भागेस्तीति तु दुर्ज्ञेयम् । एवं मंत्रेपि बीजांशयोरकारहकारयोरवस्थितयोः परिज्ञानाय संकेतभाषयोक्तं योगिनीहृदये । "मध्यप्राणप्रथारूपस्पंदव्योम्निस्थिता पुनः । मध्यमे मंत्रपीठे तु त्रितीये पिंडके पुनः। राहुकूटाद्वयस्फूर्जदि" ति। अन्वयार्थः। कलाकामयोर्मध्यस्य विसर्गस्य यः प्राणश्चैतन्यं तस्य प्रथा प्रथुत्वेन श्रूयमाणता। स्थूलतेति यावत्। तद्रूपं यत् स्पंदव्योम हकारः। स्पंदते उत्पद्यत इति स्पंदं व्योम यस्मादिति व्युत्पत्तेः । "हकाराद्व्योमसंभूतमित्युक्तेरिति केचित्। मध्यात्मको विसर्गाभिन्नोयः प्राणो हकारस्तस्य प्रथारूपो यःस्पन्दः स्थूलरूपासृष्टिरित्यर्थः । तद्रूपं व्योम हकार इत्यर्थो युक्तः । "हशिवो गगनं प्राण" इति मातृकाकोशात् । मध्यम इत्यस्

द्विरन्वयः। तत्रैकं पदं मंत्रपिण्डेनसह सामानाधिकरण्येनान्वेति। अपरं वैयधिकरण्येन मध्यमकूटस्य मध्यमव्यञ्जने। द्वितीयहकार इत्यर्थः। द्वितीयगेषु सप्तसु व्यञ्जनेषु तस्य चतुर्थत्वेन मध्यमत्वात् तत्र स्थिता। स्त्रीलिंगाच्छक्तिर्विशेष्या। त्रितीयकुटे तु सकारे अकारो मूलबीजीय इत्याह राहुकूटेति। लघुषोढाभ्यासान्तर्गत ग्रहन्यासे राहोः शषसहाख्यवर्णचतुष्टयसहितस्य वक्त्रे न्यासः। "वक्त्रेशादिचतुर्वर्णैः सहितं राहुमेवच" इति वचनात्। तेन शादिचतुष्कं राहुकूटं। तत्रद्वयात् भिन्नः अद्वयः त्रितीयः सकारः। तस्मिन् स्फूर्ज्जत् शोभमानं। नपुंसकलिङ्गबलात् ब्रह्मविशेष्यं। शिव इत्यर्थः। इत्यलमति रहस्यार्थप्रकाशनेन॥ १५॥

तदेतत्सर्वमभिसंधायाह।

अहकारौ शिवशक्तीशून्याकारौ परस्पराश्लिष्टौ।
स्फुरणप्रकाशरूपावुपनिषदुक्तं परं ब्रह्म॥ १६॥
विश्वसिसृक्षावशतः स्वार्धां शक्तिं विलोकयद्ब्रह्म।
बिंदूभवतितमिन्दुं प्रविशति शक्तिस्तु रक्तबि-
न्दुतया॥ १७॥ एतत्पिडद्वितयं विसर्गसंज्ञं
हकारचैतन्यम्। मिश्रस्तु तत्समष्टिः कामाख्यो

रविरकारचैतन्यम् ॥ १८ ॥ एषाहंपदतुर्यस्वर-कामकलादिशब्दनिर्देश्या । वागर्थसृष्टिबीजं तेनाहंतामयं विश्वम् ॥ १९ ॥ अंत्यप्रथमे मध्यचतुर्थे मंत्रेपि तौ व्यक्तौ । तेनांबामनुज-गतामभेद एवात्र भावार्थः ॥ २० ॥

अत्र शिवबिन्दोः शुक्लत्वाच्चन्द्रात्मकत्वात्पिण्डवाचकत्वाच्चन्द्रपदानामिन्दुपदेन बिन्दुनिर्देशः कृतः । भावार्थ इति । भावोजन्म । "भावस्सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु" इत्यमरः । स एवार्थः प्रयोजनं ज्ञेयत्वाद्यत्र सः अर्थो ज्ञेयो यत्रेतिवा । "अर्थोभिधेयरैवस्तु प्रयोजननिवृत्तिषु" इत्यमरः ॥ २० ॥

अथसंप्रदायार्थमाह ।

व्योमादिजनकहकरसलार्णैर्घटनेन पंचभूतमयी । पञ्चचतुस्त्रिद्व्येकगशब्दादि गुणात्मपंचदशवर्णा ॥२१॥

व्योम आकाशः । आदिना वाय्वग्निर्जलभूमिपरिग्रहः । एतत्पंचकस्य जनकाये हकारसलार्णा हकारादिवर्णास्तैर्घटनेनेयं विद्यापंचभूतमयी पंचभूता भिन्ना । उक्तंच । "हकाराद्व्योमसंभूतं ककारात्तु प्रभंजनः । रेफादग्निस्सकाराच्च जलतत्वस्य संभवः । लकारात्पृथिवी

जाता तस्माद्विश्वमयी च सा" इति। अत्र यद्यपि प्रकाशविमर्शसामरस्यात्मकवस्तुविशेषस्यैवशब्दार्थसृष्टिजनकत्वम (पि) वशिष्टं तथापि प्रकाशांशस्यैवार्थसृष्टौ विमर्शांशस्यैव शब्दसृष्टौ जनकत्वं । तयोः परस्परसापेक्षत्वेनैव स्वस्वकार्यजनकत्वस्य श्रुतिस्मृतिसिद्धत्वादेकस्य स्वकार्यजनकत्वे अपरस्य तत्कारणतावच्छेदकत्वमावश्यकं । एवञ्च कारणतावच्छेदककारणतयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण द्वयोरपि प्रातिस्विककारणत्वसिद्धिः । तदभिप्रायेणैवहि तंत्रेष्वन्यतरस्यैव कारणता बोधकानि वचनानीति ज्ञेयम्। भगवता व्यासेनापि "शब्द इति चेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यां" इति सूत्रेजगतः शब्दात्प्रभवः श्रुति स्मृतिभ्यां सिद्ध इत्युक्तं। तद्भाष्ये च निपुणतरमुपपादितम्। एवं च प्रथमं विमर्शशक्तेर्हकार उत्पन्नः। ततः प्रकाशाद्व्योम। ततोविमर्शात्ककारः। ततः प्रकाशाद्वायुः। ततोविमर्शाद्रेफः। ततः प्रकाशादग्निः। ततो विमर्शात्सकारः ततः प्रकाशाज्जलं । ततो विमर्शाल्लकारः। ततः प्रकाशात्पृथिवीत्येवं क्रमेण पंचमहाभूतोत्पत्तौत्सत्यामपि हकारात् विमर्शविशिष्टप्रकाशस्यैव व्योम प्रति कारणत्वादुक्तरीत्या कारणतावच्छेदकत्वस्य हकारे सिद्धिः विनिगमनाविरहात् कारणत्वमपि सिध्यति । एवमेवककारादिषु द्रष्टव्यं । नचैवं हकारादेर्वाय्वादिकं प्रत्यपिकारणत्वापत्तिः । उक्तरीत्या परंपरया कारणतायामवच्छेदकत्वात्। एवं व्योमादेरपि ककारादिकं प्रतिजनकत्वापत्तिरिति वाच्यम्। तेषामन्यथासिद्धत्वादिष्टत्वाद्वा। ननु विद्यायां पञ्चभूतात्मकवर्णपञ्चक-

मेवास्तु किमधिकैर्वर्णैरित्यत आह । पंचेति । आकाशःपंचविधः । वायुश्चतुर्विधः । अग्निस्त्रिभागः । जलंद्विभागं । पृथिव्येकविधेति पंचीकरणवार्तिकादौ स्पष्टं । पंचादिसंख्याकानामाकाशादीनां गुणाः शब्दादयोपि तादृशसंख्याकाः । तेन व्योमादिपञ्चसु पंचशब्दाः । वाय्वादिषु चतुर्षु चत्वारस्पर्शाः । अग्न्यादिषु त्रिषु त्रीणि रूपाणि । जलभूम्योः द्वौ रसौ । पृथिव्यामेको गंध इत्येवं संहत्य पंचदशगुणाः विद्यागतैः पञ्चदशभिर्वर्णैरभिन्ना इति पञ्चदश वर्णानामुपपत्तिरिति भावः । अथ पञ्चदशगुणैः पंचदशवर्णानामभेद उपादानोपादेय-भावाद्वाच्यवाचकभावाद्धर्मधर्मिभावाद्वा वाच्यः । स च न संभवति । तथाहि । अत्र हि पंचदशसंख्याकत्वमचां प्राधान्येन । व्यञ्जनानां तद्भक्तत्वेन चोपपादनीयं । "एष वै सप्तदशः प्रजापतिः" इति वेदे । "चतुरश्च यतावाद्यक्षरलोपश्च" इति पाणिनीयसूत्रे । "च-तुश्शतमुत्कृतिः" इत्यादिच्छन्दस्सूत्रे च तथैवनिर्णीतत्वादित्यस्या-र्थस्य छन्दोभास्करे अस्माभिस्साविस्तरमुपपादनात् । नह्यत्रत्यानां पंचदशानामचांगुणजनकत्वं गुणवाचकत्वं गुणाश्रयत्वं वा संभवति । मानाभावात् । ननु हकार पंचकस्य व्योमपंचकजनकत्वेन तद्वाच-कत्वेन चाभेदसिद्धेः तद्गुणैश्शब्दैरपि सहाभेदःसिद्धप्राय एव । गुण-गुणिनोरभेदेन गुणस्य गुण्यभिन्नत्वस्य न्याय सिद्धत्वात् । यथैव वा-च्यवाचकभावस्य अभेदनियामकता तथैव लक्ष्यलक्षकभावस्यापि । अस्तिहि प्रकृते हकाराणां शब्दलक्षकत्वं । शब्दस्य हकारशक्य-

संबन्धित्वात्। अत एव योगिनीहृदये। "व्योमबीजैस्तु विद्यास्थैर्लक्षयेच्छब्दपञ्चकम्" इत्युक्तं। यत्तु शक्यसंबन्धप्रदर्शनकारिकायां तत्रैवोक्तं। "भवेद्गुणवतां बीजं गुणानामपि वाचकं। कार्यकारणभावेन तयोरैक्यविवक्षया" इति। तत्र लक्षकेपि वाचकपदप्रयोगो वाचकनिष्ठस्य स्वबोध्यभेदव्याप्यत्वस्य लक्षकेपि तुल्यत्वद्योतनफलको गौण्या वृत्त्या एवोपपद्यते। एवं वायुवाचकादीनामपि स्पर्शाद्यभेद उपपादनीयः। नच तथापि पञ्चदशानामचां तदभेदो न संभवतीति वाच्यं। नहि प्रकृते अच एव विवक्षिता इति नियमः। हकारादिव्यञ्जनैरपि पञ्चदश संख्योपपादनसंभवात् नच संख्याधिक्यं। आधिक्येपि सहस्रे शतं भवतीति न्यायस्य जागरूकत्वात्। "गुणाः पञ्चदशाख्याता भूतानां तन्मयी शिवा" इति वचनस्थस्य तन्मयीत्यस्य भूतमयी गुणमयी पञ्चदशसंख्याकावयववती विद्यादेवी शिवेत्यर्थवर्णन संभवादिति चेन्न। "व्याप्तापञ्चदशार्णैस्साविद्या भूतगुणात्मिका। पञ्चभिश्च तथा षड्भिः चतुर्भिरपिचाक्षरैः" इति स्फुटतर वचनविरोधात्। तत्रहि सामान्येन पञ्चदश संख्याकाक्षरवत्त्वमुपपाद्य संभावितनानाशङ्कापरिहाराय विशिष्य विशिष्य कूटत्रयाक्षराणां गणनयाऽज्भिरेव सव्यञ्जनैस्संख्यापूर्तिरित्यस्य स्पष्टं निर्धारितत्वादिति। अत्र ब्रूमः। सत्यमज्भिरेव पञ्चदशत्वं। तथापि हकारादि व्यञ्जनानामेव गुणाभेदः। तेषामेव तद्वाचकत्वात्। शक्ततावच्छेदकन्तुपञ्चदशसंख्या समवायित्वसमानाधिकरणहकार-

त्वादिकं। न पुनश्शुद्धहकारत्वादिकम्। अन्यथा हकारेण व्योमवाचकेन प्रकृते शब्दलक्षणायां युगपद्वृत्तिद्वयविरोधापत्तेः। शब्दैक्येपि शक्ततावच्छेदकरूपधर्म्मद्वयभेदेन अर्थभानमुपपद्यते। कथमन्यथा लिङ्गादौ शब्दभावनार्थभावनयोः शक्त्याभानं। लक्षणयाच कर्तुर्भानं मीमांसकानां। अत एव चोक्तश्लोके "गुणानामपि वाचकमित्ये" वोक्तं। यत्तु तत्पूर्वश्लोके "लक्षयेत्" इति पदं तद्बोधयेदित्यर्थकं। अस्तु वा लक्षणापि। भिन्नधर्मावच्छिन्नस्य पदस्य एकधर्मपर्याप्तावच्छेदकताक शक्तता लक्षकतारूपवृत्तिद्वये योगपदस्येवाविरुद्धत्वात्। वाचकपदमेव संजातप्रतिपक्षत्वादुपक्रमन्यायेन अन्वयितव्यं। वस्तुतस्तु गुणवतां वाचकं बीजं गुणानामपि वाचकमित्यन्वयः। बीजे गुणवद्वाचकत्वं परिकरालङ्कारवद्धेतुत्वाभिप्रायगर्भं। हकारस्य शब्दवत्येव शक्तिर्नपुनराकाशमात्रे। तेनच गुणस्य शक्यतावच्छेदकत्वेन शक्यतावच्छेदकेपि शक्तेः प्राचीनैरङ्गीकारात्। गुणानामपि वाचकमित्यर्थः। तेन लक्षयेदित्येतत् ज्ञानार्थकं। तेनैकैव शक्तिरुभयत्रेत्यतो न वृत्तिद्वयविरोधः। नवा शक्ततावच्छेदक भेदगवेषणा। पञ्चदशवर्णानां पञ्चदशगुणाभेदकथनन्तु "दशसंपद्यन्ते" "दशाक्षराविराट्" "अन्नंविराट्"। इत्यादिवत् स्तुतिमात्रमित्यादि बुद्धिमद्भिरूह्यमिति संक्षेपः॥ २१॥

इदानीं "प्रधानं तेजसोरूपं तद्बीजेनहि जन्यते" इतिवचन-

स्वारस्यमनुसन्दधानो गुणानां गुणिबोधकाक्षर बोध्यत्ववत् तज्जन-काक्षर जन्यत्वस्यापिसत्वादभेदस्संभवतीत्याह ।

तत्तजनकैर्वर्णैस्तत्तत्संख्यैस्तु तद्गुणा जाता ।

पञ्चादि संख्याका इति शेषः । विद्यायां हि मायात्रये हकारत्रयं मध्यम कूटे हकारौ द्वौ । एवं पञ्चभिर्हकारैः पञ्चशब्दा उत्पन्नाः । अतएव तेषामर्थाः शब्दा एव । ये ये यद्यज्जनकास्तेषां तेषां त-एवार्थं इति वक्ष्यमाणत्वात् । उक्तञ्च । "व्योमबीजैस्तु विद्यास्थैर्ल-क्षयेच्छब्दपञ्चकम्" इति । ननु भावार्थप्रकरणे मध्यम हकारस्य विद्यामूलबीजात्मक कामकलार्थरूपत्वमुक्तमिति तस्य शक्तिवाच-कत्वमेव युक्तन्नपुनश्शब्दलक्षकत्वमिति चेन्न । नह्येकवाचकत्वं अपरालक्षकत्वे तन्त्रं । वृत्तिद्वयविरोधस्य परिहृतत्वात् । "गङ्गायां घोषमत्स्यावित्यादौ तस्येष्टत्वाच्च । वस्तुतस्तु शिवशक्त्यात्मक-मूलबीजात्मकौ अकारहकारौ तु सूक्ष्मतमादप्यत्यन्त सूक्ष्मरूपा-वित्युक्तं । इहतु वैखर्यात्मकस्थूलरूपयोरेवार्थान्तरपरत्वमुच्यते । अतएव "मध्यप्राणे" त्यनेन तादृशसूक्ष्मरूपतां द्योतयित्वा तस्य प्र-थारूपो यः स्पन्दः स्थूलत्मिका सृष्टिस्तद्रूपे व्योम्नि हकारे स्थितेत्युक्तं। नपुनः स्थूल हकार एवशक्तिरिति । उक्तञ्च । "तेषां कारणरूपेण स्थितं ध्वनिमयं परम्" इति । तेषां शब्दानां । शब्दसृष्टेः सर्वस्यापीत्यर्थः । कारणं शक्तिः । तस्यारूपं सूक्ष्मतमादपि परं । तादृशेन रूपेण

उपलक्षितं सत् । ध्वनिमयं ध्वन्यभिन्नं सत् स्थितं । परं परब्रह्मेत्यर्थः सर्वेष्वपि वर्णेषु वर्णांशध्वन्यंशौ परस्परसंसृष्टौ वर्तेते । सुवर्णे परस्पर संसृष्टपार्थिवतैजसांशवत् । कत्वादि वर्णधर्म्माणां तारत्वमन्द्रत्वषड्ज त्वादि ध्वनिधर्म्माणांच सर्ववर्णेषु अनुभूयमानत्वात् । अतएव शारी रकभाष्ये स्फोटनिरासाय वर्णानामेव नित्यत्वमङ्गीकर्तुं तेषामेकै वृत्तिरूपत्वमुपपाद्य वैलक्षण्यप्रतीतिः सर्वापिध्वन्यालंबनत्वेन उपपा दिता देवताधिकरणे । तथाच मध्यम हकारे ध्वन्यंशः परब्रह्मवाचकः वर्णांशस्तु शब्दलक्षक इति विवेक इति भावः । येतु हादिवि पक्षपातिनो योगिनीहृदयस्य संपूर्णतन्त्रस्यापि हादिविद्यायामे तात्पर्यमिति मन्यमाना इहान्यथा व्याचक्षते । परं षष्टं हाक्षरं ते पञ्चानां अपि शब्दानां कारणभूतो यो ध्वनिर्नादः तन्मयं तद्वाचक मिति । तेषां तत्र ग्रन्थ स्वारस्यभङ्गेन क्लिष्ट (गुप्त) तरं व्याख्यानमे शरणमिति तत्र तत्र स्पष्टीकरिष्यामः ।

ननु तथा सति वायुजनकककाराणामेव चतुर्विधस्पर्शजनकत्वस्य आवश्यकत्वात् ककाराणाञ्च चतुर्णामभावादनुपपन्नमिदमित्याह ।

कामकलाभिस्पर्शास्तार्तीयेकारतश्च चत्वारः ॥ २२ ॥

कामकलाभिरिति । महामायायां त्रय ईङ्कारा एकस्तृतीयाक्षर रूपश्चेति चतुर्भिरीकारैः चतुर्धा स्पर्श उत्पन्नः । नपुनः ककारैरि त्यर्थः । तदुक्तं । “महामाया त्रयेणापि कारणेन च बिन्दुना । वाय्वग्नि

जलभूमीनां स्पर्शानाञ्च चतुष्टयम् ॥ उत्पन्नं भावयेद्देवि स्थूलसूक्ष्म विभेदतः” इति। माहामयां यत्त्रयमीकारत्रयं तेन । कारणेनच केवलेनेकारेणच ।तस्यै विश्वकारणत्वस्य पूर्वमुक्तत्वात्। बिन्दुनेति कामकलाचतुष्कस्यापि विशेषणं। तस्य तत्र विन्द्वात्मकत्वात्। तुरीय-बिन्दुजन्यत्वाद्वा । तच्च वायुमण्डलस्य बिन्दुलाञ्छितत्व द्योतनाय । स्थूलो व्यापको वायुगतः । सूक्ष्मा व्याप्या अग्न्यादि त्रयनिष्ठाः। हादि पक्षपातिनस्तु ककाराणां कामकलानाञ्च हादिविद्यायां त्रित्रि संख्याकत्वेन चतुर्थालाभात् बिन्दून्विभज्य गणयन्ति । तत्पक्षे एकै-कस्याः कामकलायास्त्रित्रि बिन्द्वात्मकत्वेन नव संपद्येरन्। विसर्गत्वेन बिन्दु द्वयस्यैक्येतु विसर्गास्त्रयः कामास्त्रय इति षट्। कामत्वेन त्रया-णामैक्येतु विसर्गत्वेनापि त्रयाणामैक्यापातात् द्वयं । तुरीयबिन्दोरपि मेलनेतु विभागे द्वादश। तदभावे त्रयमिति सर्वधा न चतुस्सङ्ख्या-सिद्धिः। महामायायां कामकलायां यत् बिन्दुत्रयन्तेन । कारणबिन्दु स्तुरीयस्तेन चेति व्याख्यानेतु अन्ययोरीकारयोर्वैयर्थ्यमिति-स्पष्टं । नच गुणगुणिनोरेकमेवकारणं । कपालादेरेव घट तद्गतरूपे प्रतिकारणत्वात्। इति नियमो व्योमशब्दजनक हकारादौ इष्टो भज्येत इति वाच्यं। तस्य वचनबलात् पाकेन रूपाद्युत्पत्तिदर्शनेनच औत्सर्गिकत्वात्। त्रिविधरूपन्तु मायान्तर्गतैस्त्रिभीरेफैर्जन्यते । “रूपाणां त्रितयन्तद्वत्त्रिभीरेफैर्विभावितमि”ति वचनात् । एवं रसद्वयं सकारद्वयेन । “विद्यास्थैश्चन्द्रबीजैस्तु स्थूल सुक्ष्मोरस-

स्मृतः" इति वचनात् । चन्द्रबीजैस्सकारैः । स्थूलोऽव्यापको जलगतः । सूक्ष्मो व्याप्यो भूगतः । "पदमभ्यधिकाभावात् स्मारकान्नातिरिच्यते" इति न्यायेन पदार्थोपस्थितेः स्मृतिरूपत्वात् स्मृत इत्युक्तं । यद्यपि कादिविद्यायां द्वावेव सकारौ । तथापि "विद्यास्थैश्चन्द्रबीजैरि"ति बहुवचनाभ्यामपि रसस्य द्वैविध्यात् । "अक्षीणि मे दर्शनीयानि" । "पादामेसुकुमारा" इति महाभाष्यप्रयोगात् द्वित्वसङ्ख्यैव कथ्यते । अतएव स्थूलसूक्ष्मपदगत प्रत्येकैकवचनाभ्यां द्वित्वमेव स्पष्टीकृतं । ननु व्योमबीजे गुणलक्षणायुक्ता । शक्यसंबन्धात् । चन्द्रवाचक बीजस्यतु चन्द्रगतामृतलक्षकत्वमेव वाच्यं । नपुनर्जलगत रसलक्षकत्वं । असंबद्धलक्षणायामतिप्रसङ्गात् । नच व्योमवाचकस्यापि वाय्वादिगत शब्दलक्षकत्ववदुपपत्तिः । तत्रापि नभोगुणस्य व्यापकत्वेन स्वशक्यसमवेतव्याप्यत्वरूपसंबन्धस्य सत्वात् । अतएव "प्रधानन्तेजसो रूपं तद्बीजेनहि जन्यते" इति वचनेन तेजोरूपस्य व्यापकत्वलक्षणं प्राधान्यं शक्यसंबन्धप्रदर्शनायैवोक्तं । तन्न्यायस्य हकारादावपि तुल्यत्वेनादोषात् । नच तथा अमृतव्याप्यत्वे जलरसस्य संभवति । तदभाववद्वृत्तित्वादिति चेन्मैवं । अमृतेपि रसस्य समवेतत्वेन लक्षणोपपत्तेः । अतएवोक्तं । "संबन्धो विदितो लोके रसस्याप्यमृतस्य चे"ति । अमृतरसयोराश्रयाश्रयिभाव लक्षणोऽभेदलक्षणो वा संबन्धो लोकप्रसिद्ध इति न लक्षणायां विवदितव्यमित्यर्थः ।

शक्यतावच्छेदकेपि शक्तिरिति पक्षे रसामृतयोरभेदस्य लोकसिद्ध-त्वाद्रसाभिन्नामृतवति शक्तस्य सकारस्य रसोपि शक्यतावछेदक इति भावः । हादिविद्या पक्षपातिनस्तु चन्द्रबीजैरिति बहुवचनस्य स्वानुगुणत्वं मत्वा तुष्यन्तः त्रिभिस्सकारैः त्रयो रसा लक्ष्या इति व्याख्याय ननु रसस्य द्वैविध्यात् त्रितीयसकारः किमर्थ इत्याशङ्क्य अमृतरसोप्येको रसोस्तीति तल्लक्षकत्वेन उद्ग्रन्थमेव समाधाय नन्वेवं सति त्रितीयरसाधारत्वेन भूजलभेदात् षष्ठमहाभूतस्य प्राप्ति-रित्याशङ्कायां संबन्धो विदित इति ग्रन्थमवतार्य । जलामृतयो-स्संबधोहि लोकप्रसिद्धः । तस्य जलनिधावेव उत्पन्नत्वात् । अतो जलएवान्तर्भाव इत्याशयपरत्वेन व्याचक्षते । तेषां रसस्येति पदस्य जलनिधौ लक्षणा । स्थूल सुक्ष्मपदाभ्यां प्रत्येकैकत्ववत्वेन लब्ध-द्वित्व विरोधश्च । जलेन्तर्भावे सिद्धे पुनर्वैयर्थ्यं तादवस्थ्यञ्च । प्रत्युत जलामृतयोरभेदात् प्रातिस्विकममृतवाचकः सकारोपेक्षित इत्ये-वार्थः संभवतीति । एवं लकारस्य गन्धबोधकत्वं । वसुन्धरागतो गन्धस्तल्लिपिर्गन्धवाचिकेति वचनात् ॥ २२.॥

नन्वेकेनैव लकारेणैकविधगन्धबोधोपपत्तेरितरद्वय वैयर्थ्यं मत आह ।

भुवनत्रयसंबन्धादासीत्त्रेधा.लकारोपि ।
ये ये यद्यज्जनकाः तेषां तेषां त एवार्थः ॥ २३ ॥

भुवनत्रयेण सह वाच्यवाचकभावसंबन्धाल्लकारस्य त्रैविध्यं जन्यजनकसंबन्धाद्वा । "भुवनत्रयसंबन्धात् त्रिधात्वन्तु महेश्वरि" इति वचनात् । स्पष्टमन्यत् ॥ २३ ॥

इदानीं वायुजनकानामपि ककाराणां अर्थान्तरमस्तीति पूर्वोक्तस्य ये ये यद्यादित्यस्य औत्सर्गिकस्य नियमस्याऽपवादमाह ।

ककारत्रय वाच्यास्तु सकलाः प्रलया कलाः ।
विज्ञान केवला श्वेति त्रिप्रकारा उपासकाः ॥२४॥

प्रमातारः साधकाः पशव इत्यादिपदाभिधेया उपासकाः त्रिविधाः । अधमा मध्यमा उत्तमा श्चेति । त एवा ऽशुद्ध मिश्र शुद्ध पदैस्सकलादि पदैश्च क्रमेण व्यवह्रियन्ते । तत्र भेदैकदृष्टयः शिवाहं भाव भावनाहीनाः कर्मैकरताः प्रथमाः । सुपक्व मलकर्माणः "चिति श्चेत्यंच चैतन्यं चेतन द्वयकर्मच । जीवः कलाशरीरं च सूक्ष्मं पूर्यष्टकं भवेत्" इति श्लोकोक्त सूक्ष्मपुर्यष्टक संबन्धशालिनः कर्मज्ञान मार्गयोः साधारणाः द्वितीयाः । निरस्तभेदाः सर्वत्र शिवैकदृष्टयः पूर्ण ज्ञानिन स्तृतीयाः । एतेच स्वच्छन्द्रसंग्रहे विस्तरेण प्रपञ्चिताः । ते त्रयाणां ककाराणां वाच्याः । तदुक्तं । "अशुद्ध शुद्धमिश्राणां प्रमातॄणां परं वपुः । क्रोधीश त्रितयेनास्य विद्यास्थेन प्रकाशितं" इति । क्रोधीशः ककारः । नचाकाराणां

पार्थक्यस्य अग्रे वक्ष्यमाणत्वेन एकैक हलात्मका एव हकारककारादयो वाचका वक्तव्याः। तथाच ककारे जश् भावेन गत्वापत्तिरिति वाच्यं। एकहल एव पदत्वेन पदान्तत्वाभावात्। व्यपदेशिवद्भावस्य "टकितौ सुप्पितौ" इत्यादि ज्ञापकेन अनित्यत्वात् ॥२४॥

अकारैर्दशसंख्याकैरुच्यन्ते जीवराशयः।
विद्यायाः प्राणभूतस्संस्तद्वाच्येकादश स्वरः॥ २५॥

पञ्चदंश्यां द्वितीय तृतीयवर्णौ हल्लेखा त्रयञ्चमुक्त्वा अवशिष्टेषु दशस्वक्षरेषु अकारा दश। तेषां जीवराशय एव वाच्याः। एकेनाप्याभिधान संभवेद्दशभिरभिधानं जीवानां आनन्त्य द्योतनाय। तृतीय कूटाद्याकारेतु ध्वनिस्वरूपस्यैव भावार्थ प्रकरणे मूल बीजांश रूपत्वमुक्तमिति न विरोधः। एकादशस्वर एकारः। सच विद्यालक्षणस्य मूलबीजोत्थ वृक्षस्यान्तरः प्राणस्सन्नपि। स्वयंस्वाच्यपि। लोकेपि क्षत (स्य) पुनः प्ररोहणादिना अनुमीयमानस्याध्यात्मिक वायुसंबन्धस्य. वृक्षादावङ्गीकारात्। उक्तञ्च। "श्रीकण्ठदशकं तद्वदव्यक्तस्यहि वाचकम्। प्राणभूतस्थितो देवि तद्वदेकादशः परः। एकस्सन्नेवपुरुषो बहुधाजायतेहिसः" इति। श्रीकण्ठाः अकाराः। अव्यक्तोजीवः। एकादश एकारः। "सन्धिरेकादशोभद्रा पद्मनाभः कुलाचलः" इति कोशात्। "यदेकादशमाधारं बीजं कोण त्रयात्मकम्" इति प्रयोगाच्चयोग

रूढोयं शब्दः । तस्यच शुद्धयोगापेक्षया परत्वमस्त्येव । स
प्रकृते एकोपिदृश्यमानो बहुरूपः परिणमते । उक्तञ्च कादिमते
"यदेकादशमाधारं बीजं कोण त्रयात्मकं । ब्रह्माण्डादि कटाह
न्तंजगदद्यापि दृश्यते" इति । हादि पक्षेतु शुद्धयौगिकत्वमङ्गीकृ
श्रीकण्ठपरत्वेन एकादशपदं व्याख्याय परो द्वादशः पुरुषःप
शिवः तद्वाचक इति व्याचक्षते । तत्क्लिष्टमिति स्वर इति विशेष्ये
अकार व्यावर्तकेन सूचितं । ननु श्रीकण्ठ दशकस्य एकस्मिन्ने
श्लोके प्रतिसंबन्धित्वेन निर्दिष्टस्य उपस्थित्यैकादशोपि श्रीक
ण्ठएवेति चेन्न । रूढप्राबल्ये तादृशोपस्थितेरप्रयोजकत्वात्
कथमन्यथा ज्ञानार्णवे । "आद्यं वाग्भवमुच्चार्य काम बीजं द्विती
यकं । कुमार्यास्तु त्रितीयन्तु त्रिपुरा परमेश्वरी" इति । त्रिपु
चक्रेश्वरी मन्त्रोद्धारः संगच्छतां । तत्रहि मायाप्रतिसंबद्धित्वेन निर्दे
शेपि आद्यद्वितीय पदाभ्यां मातृकासंबन्धिनावेव प्रथम द्वितीयौ
वर्णौ विवक्षितौ । दक्षिणामूर्तिसंहितादौ अंआंसौरित्यस्यै
प्रथमचक्रेश्वरीमन्त्रस्योद्धृतत्वात् । अन्यथा बालाया ए
त्रिपुराचक्रेश्वरीत्वं आपद्येत । तस्मान्मातृकादेश एवात्र गृह्य
त इति तार्त्तीयप्रथमस्य पूर्वमभिहितत्वात् नेहपुनरुट्टङ्कनं इत्य
पि हादि पक्षे सुवचं । परन्तु तथा सांप्रदायिकैर्व्याख्यातं
तथापि कः प्राणवाचकोऽकारः कोवा जीववाचक इत्यनिर्द्धार
तत्पक्षे दुरुद्धरम् ॥ २९ ॥

योगिनी हृदयस्थमेव पद्यं लाघवात् स्पष्टत्वाच्च निबध्नाति।

बिन्दुभिस्त्रिभिरुच्यन्ते रुद्रेश्वरसदाशिवाः।
शान्तिः शक्तिश्चशंभुश्च नादत्रितयबोधनाः॥२६॥

रुद्रः तेजस्तत्वं। "रुद्रोवा एषयदग्निरिति" श्रुतेः। तेन पुरुष नियति काल राग विद्या कला मायानां परिग्रहः। "पुरुषादिक-मायान्तं तेजस्तत्वं महेश्वरि" इति स्वच्छन्दसंग्रहोक्तेः। शान्तिः प्रकृतिः शुद्धविद्याच। अर्द्धचन्द्राद्युन्मनान्त वर्णाष्टकं नाद पदे-नोच्यते। नाद त्रितयमेव बोधनं येषांते। करणेल्युट्॥ २६॥

एवं सप्तत्रिंशत्सङ्ख्यांकपदैर्महाविद्या।
षट् त्रिंशत्तत्वानां तत्वातीतस्यचाभिधा त्रयम्॥२७॥

एवमित्यस्यानन्तरोदीरित श्लोकषट्कोक्तरीत्येत्यर्थः। तत्रहि व्योमबीज पञ्चकं। कामकलाश्चतस्रः। चन्द्रबीजे द्वे। रेफ बीज क्रोधीश बिन्दुनादास्त्रयः। श्रीकण्ठ दशकं। एकादश स्वर एक इति संहत्या सप्तत्रिंशत्पदान्युपपादितानि। तेषां च तत्वानि षट्त्रिंशत्तत्वातीतं ब्रह्मैकमप्यर्थः। तानिच यथा। शिवः। शक्तिः। सदाशिवः। ईश्वरः। शुद्धविद्या। माया। कला। विद्या। रागः। कालः। नियतिः। पुरुषः। प्रकृतिः। अहङ्कारः। बुद्धिः। मनः। श्रोत्रं। त्वक्। नेत्रं। जिह्वा। घ्राणं। वाक्। पाणिः।

पादः। पायुः । उपस्थः । शब्दः । स्पर्शः । रूपं । रसः । गन्धः आकाशः । वायुः । तेजः । आपः । प्रथिवी । एतेषां स्वरू उत्पत्तिक्रमश्च सौभाग्यसुधोदये द्रष्टव्यो विस्तरभयान्न लिख्यते तत्र शिवशक्ति शुद्धविद्या प्रकृतयो बिन्द्वर्थाः । सदाशि वादि पुरुषान्ता नवनादार्थाः । शब्दादय आकाशाद श्रोत्रादयो वागादयश्च पञ्च पञ्च हकारादेरर्थाः । अह ङ्कारादि त्रयन्तु ककारत्रयस्य श्रीकण्ठानांचार्थः । एका दश स्वरस्य तत्वातीतमर्थ इति विवेकः । यद्यपि हकारादेः शब्दा द्यर्थकत्ववत् इन्द्रियाद्यर्थकत्वं नोक्तं । तथापि "स्वरव्यञ भेदेन सप्तत्रिंशत्प्रभेदिनी । सप्तत्रिंशत्प्रभेदेन षट्त्रिंशत्तत्वरू पिणी ॥ तत्वातीतस्वभावाच विद्यैषा भाव्यते मया" इ वचनबलात्तत्तदर्थकत्वमवश्यकल्पनीयं । नच सप्तत्रिंशद्वर्णा सप्तत्रिंशत्सु क्रमेण शक्तिरस्त्विति वाच्यं । हकारादौ क्षा शक्ति परित्यागस्य शक्त्यन्तर स्वीकारस्य चापत्तेः । नच भ स्पक्षेपि एकस्य अनेककार्यकत्वं दोष इति वाच्यं । एकत्र शक्ति परत्रलक्षणेति सुवचत्वात् । नच युगपद्वृत्ति द्वय विरोधः । एतद चन बलादेव सप्तत्रिंशत्वस्य शक्ततावच्छेदकत्वाङ्गीकारेण पूर्व तस्याऽदोषत्वात् । केवल हकारस्यैव व्योमवाचकत्वादिना प्रसि तत्वेन तद्विरोधस्योद्भावनेतु वृत्तिद्वय विरोधे अकिञ्चित्कर त्वस्य सुवचत्वाच्च । प्रमाण प्रमितत्वाविशेषादापततोऽनेकार्थ

स्वख्यापि ह्र्यादि पदेऽदोषत्वाच्च । क्लृप्त शक्ति परित्यागस्तु न सर्वथा प्रामाणिकः । ननु प्रथमेंशे विद्यायां अष्टपञ्चाशद्वर्णा उक्ताः । कथमिह सप्तत्रिंशत्वेन गण्यन्त इति चेत् । सत्यं । न पुनरत्र वर्ण गतेयं सङ्ख्या कण्ठरवेणोक्त वचने श्रूयते । येनै-वमुच्येत । श्रूयमाणं सङ्ख्यामात्रन्तु पदनिष्ठत्वेनाप्युपपन्नं । अर्धचन्द्रादि वर्णाष्टकस्यैकपदत्वात् । चतुरवयव कामकला-बन्नादस्य अष्टावयवकैक वर्णत्वाङ्गीकारेपि क्षतिविरहाच्च । अतएव त्रैपुर मन्त्रे समूह मुलकारणभूते महामेरौ अर्द्धचन्द्रादीना-मष्टानामपि अर्धचन्द्रत्वरूपैकवर्णात्मकत्वमङ्गीकृत्य " नवाक्षरो महामेरुरयं ब्रह्माण्डगोलकः " इत्यादि व्यवहारः तन्त्रेषु दृश्यते । वस्तुतोऽर्धचन्द्रादेः स्थान स्वरूपादि भेदात् नैकव-र्णत्वं युक्तं । कामकलावयवेषुतु नतथेति वैषम्यं । अतएव मूले पदैरित्युक्तं । शक्तं पदमिति लक्षणात् शक्तैरित्यर्थः । नच " सुप्तिङन्तंपदं " इति पाणिनीय सूत्रात् " ते विभक्त्यन्ताः पद-मि"त्यपि न्यायसूत्राच्च शक्तं पदमित्याधुनिक परिकल्पित परि-भाषाया अप्रमाणत्वादिह पदत्वं नयुज्यत इतिवाच्यं । तथाप्य र्थवत्वेन प्रत्यक्षरं प्रातिपदिकसंज्ञायां सुबुत्पत्तेः । क्वचितुव्यत्यया-दिना क्वचिच्छाकल्यमतेन क्विन्सुपांसुलुगित्यनेनच लोपस्वीकारात् । नचैवं ककारेषु जशत्वापत्तिः । किंतिपितीत्यादि ज्ञापकैरे-काक्षरपदे तदनित्यताया ज्ञापनादिति । स्वर व्यञ्जन भेदेनैत्यस्या-

यमर्थः । स्वर व्यञ्जनयोरभेद विवक्षामपवादितुं भेदेनेत्युक्तं । अभेदे विवक्षित एवहि तयोरंगाङ्गिभावो लोकसिद्धः । तथाहि । व्यञ्जनानि तावत् स्वराङ्गानि । तत्र ककार सकार हकार लकाराः दशसंख्यकास्तु स्वाव्यवहितोत्तरक्षणोच्चार्यमाण श्रीकण्ठानामङ्गानि । हल्लेखाद्य हकारास्तु स्व स्वपूर्वोच्चार्यमाण लकारीय श्रीकण्ठानां अङ्गानीति यद्यपि "संयोगादी" ति सूत्रेण प्रतिभान्ति । तथापि "नान्तस्थ परं सवर्णम्" इति सूत्रेण परेषामेवाङ्गानीति वाच्यं । रेफास्तु सबिन्दुक कामकलानां । अनुस्वारा अपि तासामेवेति वस्तुस्थितिः तदेतत्सर्वं यजुर्वेद प्रातिशाख्य सूत्राणि त्रिभाष्य रत्नादि तद्व्याख्यानानिच जानानानां स्पष्टतरं । प्रकृतेत्वियान्विशेषः । बिन्दवोहि स्वोत्तरोच्चार्यमाण नादाख्य स्वरस्यैवाङ्गानि । नपुनः कामकलानां । "तत्पर स्वरम्" इति प्राति शाख्य सूत्रस्यात्र प्रवृत्तेः । योहि स्वरात् पूर्वमनुस्वारो नोच्चार्येत स एव स्वपूर्वस्यांङ्गमित्यनुस्वार इति तत्सूत्रस्य विषयः । नहि लोक वेदयोः क्वापि संहितायां अनुस्वारोत्तरं स्वरोच्चारणं दृश्यते । मकारनकारयोर्हि सतोर्हलिझलिच परेऽनुस्वारविधिः "मोनुस्वारः । नश्चापदान्तस्य झलि" इत्यादि पाणिनीय सूत्रयोरुपलभ्यते । तस्यच ययिपरे परसवर्ण वर्णान्तरतापत्तिविधानाच्छषसहाख्य राहुकूटे परे हंसइत्यादावलाभइत्याशयेन वेदमात्रमधिकृत्य प्रवृत्तेर्न प्रातिशाख्य मुनिना अनुस्वार मात्रस्य पूर्वाङ्गत्वमनुस्वारा इति सूत्रेण

उक्तं। तस्यच व्यञ्जनः पराङ्गं विरामैर्ल्लुण्यत इत्यादि सामवेदीय फुल्लसूक्ताद्युक्तानि साम विशेषेषु प्रयोजनानि विस्तरभयादनुपयोगाच्च नेहोल्लिखितानि। नचात्रापि प्रथम तिद्वीय कूटस्थाऽनुस्वारयोर्मिलित्वा उच्चारणेतु बिन्द्वादि नवकस्य उत्तरकूटे प्रवेशविधानेन हकारादिपूर्वत्वाभावात्। वस्तुतस्तु हलत्वमेवहि व्यञ्जनत्वं। कथमन्यथा "हलोनन्तरास्संयोगः" इति सूत्रोक्ता संयोगसंज्ञा हंस इति सकारस्य। तदभावेच हकारीयाकारे "संयोगेगुरु" इति सूत्रेण गुरुसंज्ञा सिध्येत्। इष्टाहि सा। तदेतच्छन्दश्शास्त्रीये "ग्लादिपर" इति पिङ्गलसूत्रे छन्दोभास्करे प्रपञ्चितमस्माभिः।तथाच "संयोगादिरि" ति प्रातिशाख्यसूत्रेण संयुक्ताक्षरादिमव्यञ्जनस्य पूर्वाङ्गत्वंविदधतैव चरितार्थत्वादनुस्वार इति पृथग्योगोव्यर्थः। नह्यवसाने स्वरेवापरे लोकवेदयोरनुस्वारः क्वापि दृश्यते। येन तत्सार्थक्यं। तस्मात् प्रथक् सूत्रकारस्य श्रीविद्यानुस्वार एव विषय इत्यवश्यं वक्तव्यं। तेनच कामकलानामेव बिन्दवोंऽगानि। नादस्तु द्वितीय त्रितीयेषु स्वरवत् व्यञ्जनाङ्गक एव स्वरो भविष्यतीति दिक्। अयंच अङ्गाङ्गिभावश्च "चतुर्विंशत्यक्षरा गायत्री" त्यादौ वेदे लौकिक छन्दस्सु प्रकृतेपि पञ्चदशत्व षोडशत्वाद्युपपत्यर्थं उपयुज्यते। अङ्गाङ्गिनोरभेद विवक्षया तदभिन्न प्रधानाक्षर गणनयैव सङ्ख्या पूर्तेरावश्यकत्वादिति वस्तुस्थितिः। तदपवादाय स्वरव्यञ्जन भेदेनेत्युक्तं। अङ्गाङ्गिनोर्भेदएव प्रकृतार्थे कार्यो न पुनरभेदो

विवक्षणीय इत्यर्थः । हादि विद्यायां द्वितीय त्रितीयाक्षरयोरपि सव्यञ्जनकत्वेन षष्ठिरक्षराणि । अर्धचन्द्रादेरेक वर्णत्वाङ्गीकारेपि तावदेकोनचत्वारिंशत् । बिन्दूनामपि नादेषु मेलनेनैकवर्णत्व स्वीकारेतु षट्त्रिंशत् । शक्तानितु तत्र चत्वारिंशद्व्योम बीज षट्कं मायात्रयं कारण बिन्दुरेकः रेफ चंद्रबीज भूबीज क्रोधीश बिंदुनादानां त्रयं त्रयं द्वादश श्रीकण्ठा इत्येव तदर्थोपपादनादिति न कथञ्चन सप्त त्रिंशत्ता संपद्यते । यद्यपि स्वराः पञ्चदशव्यंजनानिअष्टादशबिन्दवः त्रयः सर्ववर्णसमष्टिरेकेति सप्त त्रिंशत्ता तदुपासकैरुपपाद्यते । यदुक्तं कामकलाविलासे । "अजूव्यञ्जन बिन्दुद्वय समष्टि भेदै र्विभाविताकारा । षट् त्रिंशतत्वात्मा तत्वातीताच केवला विद्या" इति । तथापि संख्यया: पृथकत्व निवेशित स्वाभाव्येन व्यष्टिवेषेण गणितस्य पुनर्गणनं गौणं । पंचदश्यां षोडशीत्वापादकश्च । किञ्चांगां गिनोः अभेदस्य लोकसिद्धस्य अपवादतया भेदेनेति कण्ठरवेणोक्तेः लोकसिद्ध भेदानां पञ्चदश वर्णानां अभेदेन गणनस्य कुतो लाभ इति विचार्य. यद्यपि भेदपदस्य संभेदः सिन्धुसङ्गम इत्यादौ सङ्गमार्थे प्रसिद्धत्वात् इह स्वर व्यञ्जनानां सर्वेषां मेलनेनेत्यप्यर्थः सुवचः । तथापि भेदपदस्य वृत्ति क्लेशः । सामित्यनुपसृष्ठस्य तादृशार्थाऽवाचकत्वञ्च । किञ्च यथातावद्व्याप्ता पञ्चदशार्णैः इत्यनेन सामान्यतः पञ्चदश संख्याक्षरकत्वमुक्त्वा-तदुपपादनाय तदग्रिमग्रन्थे "पञ्चभिश्च तथा षड्भिः"

इतिविशिष्य कथनं । तथैव " स्वर व्यञ्जनभेदेन सप्तविंशत्प्रभेदिनी" इत्यादिना सामान्येन सप्त त्रिंशत्संख्याकाक्षरत्वं प्रतिज्ञाय तदग्रिमग्रन्थेन "व्योमबीजैस्तु विद्यास्थैः" इत्यादिना "नाद त्रितयबोधना" इत्यन्तेन विविच्य तदुपपादनमित्यविवादं । तत्रचोक्तरीत्या चत्वारींशतां उपपादनात् उपक्रमोपसंहार विरोधोदुरुद्धरः । किञ्च " बिन्दुभिस्त्रिभिरुच्यंते रुद्रेश्वर सदाशिवाः " इत्येकस्मिन्नेव श्लोके बिन्दुत्रय नादत्रययोरर्थ वर्णनेन बिन्दुत्रयस्य सप्तत्रिंशत्सङ्ख्यापूर्त्यर्थं उल्लेखो नाद त्रयस्यतु त्याग इत्यत्रतु स्पष्टं पक्षपात एव मूलमिति । एतेन कादिविद्यायां सप्तत्रिंशत्वसिध्यर्थं द्वितीय त्रितीयाक्षरयोः सन्ध्यक्षरत्वात् प्रातिस्विकं द्व्यात्मकत्वेन गणाना क्लेशः प्राचामपास्तः । हृल्लेखास्वपि तथापत्या प्रकृतबाधकापादकश्च । तस्मान्नादत्रय मेलनेनैव सप्तत्रिंशत्ता । स्पष्टमेतत् योगिनी हृदये । " हृल्लेखा त्रयसंभूतैः तिथिसङ्ख्यै स्तथाक्षरैः" इत्यसकृत् प्रति हृल्लेखं पञ्चानामक्षराणां गणनात् । तस्माद्योगिनीहृदये संप्रदायार्थप्रकरणं सर्वं कादि विद्यायामेव स्वरसमिति निष्पक्षपातं कृतमतयो विदाङ्कुर्वन्तु । अयमत्र निष्कर्षः । तत्तदक्षरैर्वाच्यान् लक्ष्यांश्च पदार्थानुद्दिश्यैकादश स्वरेण तत्वातीत ब्रह्माभेदो विधीयते । एवं विद्यावयवाक्षर समूह वाच्य पदार्थ समुदायात्मकत्वात् विश्वं विद्याभिन्नमित्यपि विधीयते । भावार्थे हि शिव शक्तिजन्यत्व ज्ञाप्यक शिवशक्त्यभेद विधेयको विद्या जगदुभयोद्देश्यक एको

बोधः । विश्वजनक जन्यत्व ज्ञाप्यक विश्वाभेद विधेयको विद्योद्देश्यकश्चैकः । विद्योद्देश्यको विश्वान्तर्गत यावत्पदार्थ प्रातिस्विक वाचकाक्षरैक घटितत्व ज्ञाप्यक विश्वाभेद विधेयक एकः । विश्वोद्देश्याभेद विधेयकश्चान्यो बोध इति भेदः ॥ २७ ॥

तदेतदभिसन्धायाह ।

जन्यजनकयोः भेदाभावात् वाच्यस्य वाचकेनापि ।
ब्रह्मणिजगतो जगतिच विद्याभेदस्तु संप्रदायार्थः २४

ब्रह्मणि जगत इत्यत्र अभेद इति शेषः ॥ सम्यक् गुरुशिष्य पारंपर्यक्रमायातमर्यादानुसारेण दीयत इति संप्रदायार्थः ॥ २८ ॥

परमशिवे निष्कलता तदभिन्नत्वं स्वदेशिकेन्द्रस्य ।
तत्करुणात स्स्वास्मिन्नपि तदभेदो निगर्भार्थः॥२९॥

स्वस्य गुरुद्वारा शिवगर्भे प्रवेशसंपादकत्वात् एतद्ज्ञानस्य विषयः शिवगुर्वात्मैक्यं निगर्भार्थपदवाच्यं ॥ २९ ॥

अथ परदेवताया विद्यायाः चक्रराजस्य श्रीगुरोरात्मनश्च ऐक्यं कौलिकार्थ इत्युच्यते । अयञ्च पञ्चानां अभेदः समान धर्मवत्वेन सिषाधयिषितः । सच समानोधर्मः “गणेशग्रहनक्षत्र”

इति तंत्रराजोक्त गणेशादि षट्कात्मकत्वाख्यः । तत्र परदेवतायां प्रथमं गणेशत्वं उपपादयति ।

माता निरुपमतेजोमय्या स्वस्या मरीचि रूपाणाम् ।
आवरण देवतानामीशत्वादुच्यते गणेशीति॥३०॥

मरीचय एवावरण देवताः ताश्चैकादशोत्तरशतसङ्ख्याकाः । तंत्र भेदेन अन्या अपि प्रतिपादिताः तादृश देवतागणस्य ईशत्वात् गणेशीति माता ॥ ३० ॥

इच्छादि त्रिसमष्टिः गुणत्रयाढ्याऽनलेन्दु रविनेत्रा ।
एवं नवभिर्योगात्ग्रहरूपेत्युच्यते माता ॥ ३१ ॥

आदि पदेन ज्ञानक्रिययोर्ग्रहणम् ॥ ३१ ॥

इन्द्रिय दशकेनान्तःकरण चतुष्केण विषयदशकेन ।
*प्रतिपुरुषं गुणतत्वैः जाता नक्षत्ररूपिणी माता ॥३२॥

गुणतत्वं सत्वादि गुणत्रयं ॥ ३२ ॥

नरपति रविकाष्ठा षट्समुद्र द्विसङ्ख्यै-
रकडबवह पूर्वैरक्षरैर्वेष्टिताभिः ।

---

* प्रकृति गुण पुरुषतत्वैः । इति पाठभेदः ।

डरलकहसवर्णाद्याकिनीभिस्तु षड्भिः
घटिततनुरितीयं कथ्यते योगिनीति ॥ ३२ ॥

नरपतयो राजानः षोडश। रवयो द्वादश। काष्टा दिशो दश। समुद्रा श्चत्वारः। षोडशादि संख्यानां अकाराद्यक्षरैः यथासंख्यमन्वयः। अकाराद्याः षोडश अमृतादि तद्देवतोपलक्षकाः। कादि द्वादश वर्णाः कालरात्र्याद्युपलक्षकाः। डादिफान्ता दश डामर्यादीनां। बादिलान्ताः षट् बन्धिन्यादीनां। वादिसान्ताः चत्वारो वरदादीनां। हक्षौद्वौ हंसवती क्षमावत्यो रुपलक्षणं। डकारादि वर्णषट्कं आदिभूतं यासामाकिनीनां ता डाकिन्यादयः। तेनामृताद्यावृता डाकिनी कालरात्र्याद्यावृता राकिनी इति प्रकारेण षड्भिः त्वगसृङ् मांसमेदोस्थि मज्जाधिपातिभिः विशुध्द्यनाहत मणिपूरस्वाधिष्ठान कुलाधाराज्ञाचक्राणां तत्तद्देवतावरण शक्तिसमानसंख्याकतत्तदीयदलनिविष्ट तावत्तावत्संख्याक देवी संवृतानां कर्णिकासु निविष्टाभिः डाकिनी राकिनी लाकिनी काकिनी साकिनी हाकिनीभिः घटिता तनुर्यस्यास्सा योगिनीत्युच्यत इत्यर्थः। यद्यपि धातवः सप्तप्रसिद्धाः। तदधिपतिरपि याकिनी नाम्नी सहस्रारपद्मे अमृतादि सकलशक्तिवृन्दाधिष्ठित दलकिम्मीरिते तिष्ठतीति तंत्रेषु प्रसिद्धं। षोढान्यासेपि क्वचिद्दृश्यते। तथापि योगिनीहृदये षण्णामेवन्यास विधानात् इह तथोक्तम् ॥ ३२ ॥

* पञ्चभिर्नाग कूर्माद्यैः प्राणापानादि पञ्चभिः ।
जीवात्मपरमात्मभ्यांचैषा राशिस्वरूपिणी ॥ ३४ ॥

आद्यादि पदाभ्यां कृकर देवदत्त धनञ्जयानां व्यानोदान समानानां च संग्रहः । एवं द्वादशात्मकत्वात् राशिरूपिणी जगन्माता । पीठानां गणेशादि समानसङ्ख्याकत्वात् तदात्मकत्वोक्तचैव तदुक्तप्रायमिति न पुनः प्रथक्संरंभः ॥ ३४ ॥

अथ विद्याया गणेशादिरूपत्वं उपपादयति ।

अकथादिकषोडशाक्षरात्मकतार्तीयककामवाग्भवैः ।
घटिताच परादि वाग्गणैरिति विद्यापि गणेशरूपिणी ३५

षोडश स्वरात्मकं तात्तीयं शक्तिकूटं । कादि तान्तरूपं द्वैतीयीकं कामराजकूटं । थादि सान्तरूपं प्रथमं वाग्भवकूटं । परादि वाक्चतुष्टयरूपं चैक व्यष्टि समष्टिभेदेन । अतः शब्दगणस्येशत्वाद्विद्यापि गणेश रूपा । वैतालीयन्छन्दः ॥ ३५ ॥

बिन्दुत्रयनादत्रय तदन्यकूटै ग्रहत्वमिह ।
नक्षत्रत्वञ्च दशाकाराणां व्यञ्जनैरपार्थक्यात्॥३६॥

---

* नागाद्यै रिपुसंख्यैः प्राणादि मरुद्भिरपिच तत्संख्यैः । जीवात्म परमात्मभ्यां राशित्वंस्याज्जगन्मातुः ॥ इति पाठभेदः ।

बिन्दुनादनिर्मुक्तं कूटमेकं बिन्दुरेको नाद एक एवं प्रतिकूटं त्रयं-त्रयमित्यर्थः। तदुक्तं। "बीजबिन्दु ध्वनीनाञ्च त्रिकूटेषु ग्रहात्मिका" इति। बिन्दवश्च ध्वनयश्चेति द्वन्द्वोत्तरं बीजानां बिन्दुध्वनयं इति तत्पुरुषात्। तेनच बीजबिन्दुध्वनीनामिति पदेन षड्गणिताभवन्ति। तेषां षण्णां त्रिकूटेषु अर्थात्तदतिरिक्तेषु त्रिषु मेलनेनेति शेषः। षष्ठ्या वा संबन्धित्वं अर्थः। तैः षड्भिः संमेल्य गणितेषु कूटेषु सत्सु ग्रहात्मिका विद्या भवतीतियोजना। येतु बीजपदेन हकार रेफाकार समूहमात्रं तानिच बिन्दवश्च ध्वनयश्च इत्यादि त्रिपद द्वन्द्व इति व्याख्याय बीजमात्रेणावयव विशेष साचिवेन ग्रहत्वमुप-पापयन्ति तेषां इतरांश वैयर्थ्यं। संपूर्णाया विद्याया एव गणेश नक्षत्रात्मकत्वोक्त्या प्रकृते विद्यैकदेशस्यैव ग्रहत्वोपपादने क्वचिदे-कदेशे क्वचित् संपूर्णायामिति वैरूप्यं च। यथाच योगिन्या-देरपि नैकदेश रूपतापत्तिः तथा अनुपदमेव वक्ष्यामः। किञ्च बिन्दुनिर्मुक्तस्य बीजत्वाभावात् बीजपदेन परामर्शोपि नोचितः। कथमन्यथा शुद्धं बिन्दुयुतं इत्यादि दशविध मातृकान्यासान्तर्गत शुद्धमातृकान्यास प्रकरणे बिन्दुविनिर्मोके सति केवलानां अक्षराणां बीजत्वाभावापत्त्या बिन्दुयुतन्यासे पौनरुक्त्येपि साबिन्दुकएव शुद्धन्यासः कार्य इति सांप्रदायिकानां उक्तिस्संङ्गच्छत इति दिक्।

संप्रदायार्थप्रकरणे सप्तत्रिंशद्वर्णा उक्ताः। तेषु दश श्रीकण्ठानां स्वस्वव्यञ्जनैस्सह गणने दश संख्याया बाधे सप्तविंशतिरवशि-

व्यन्ते । तेनच नक्षत्रात्मकत्वं सिद्धमित्याह ।नक्षत्रत्वश्चेति । तदुक्तं । " हृल्लेखात्रयसंभूतैः तिथिसङ्ख्यैस्तथाक्षरैः ॥ अन्यैर्द्वादशभिर्वर्णै रेषा नक्षत्ररूपिणी " इति ॥ ३६ ॥

हृल्लेखाभिस्तिसृभिः तदन्यकूटैश्च योगिनी-
योगात् । राशीभूताप्येषा तिसृणां पूर्वाक्षरै-
रैक्यात् ॥ ३७ ॥

हृल्लेखात्रयं तद्विनिर्मुक्तं कूटत्रयञ्चेति षड्भिर्योगात् एषा विद्या योगिनी । तिसृणां हृल्लेखानां पूर्ववर्णैः लकारैः सहगणनायां द्वादश सङ्ख्याकावयवशालित्वात् राशिरूपाप्येषा ॥ ३७ ॥

देव्या रूपान्तरत्वेन विद्यायास्तदभेदतः ।
गणेश ग्रहनक्षत्रयोगिनी राशिपीठता ॥ ३८ ॥

अथ चक्रराजे गणेशादित्वमाह ।

रेखादलकोणगणैः घटनाच्चक्रे गणेशत्वं ।
त्रैलोक्यमोहनाद्यैः नवभिश्चक्रैर्ग्रहत्वञ्च ॥ ३९ ॥

रेखाः चतुरश्राः तिस्रः । वर्तुलाः तिस्रः दलानि चतुर्विंशतिः । कोणाः त्रिचत्वारिंशत् । त्रैलोक्येति सर्वानन्दमयान्तैरिति शेषः ।

रेखाभिस्तिसृभिः अकथादिमयीभिर्मध्यत्रिकोणगाभि र्गणेशत्वं वदतां चक्रैकदेशे तदापत्त्या वैरूप्यं दोषः ॥ ३९ ॥

वृत्तत्रय धरणीत्रय मन्वश्राणां त्रिभज्यगणनेन ।
सप्तभिरितरैश्चक्रै चक्रे नक्षत्र रूपत्वम् ॥ ४० ॥
पञ्च चतुश्शक्त्यनला बिन्दुर्वृत्तंच भूबिंबम् ।
एवं द्वादशसङ्ख्यैर्घटनाच्चक्रस्य राशित्वम् ॥४१॥

स्वाभिमुखाग्र कोणानि पञ्चशक्तयः पराङ्मुखाग्रकोणानि चत्वार्यनलाः । वृत्तं पद्मद्वयगर्भितं । येतु नवत्रिकोणानि द्वे पद्मे भूगृहमेकमित्याहुः तेषां बिन्दु परित्यागो दोषः ॥ ४१ ॥

चक्रं विद्याक्षरैरेव जननात्तदभेदवत् ।
देव्या रूपान्तरत्वाच्च तेन युक्तोक्तरूपता ॥४२॥
यावन्मातृकमुदितान्येकसमेतानि पञ्चाशत् ।
पीठानि पुनर्गणितान्योजा पूकानि चत्वारि ॥४३॥
गणपग्रहभादीनां शशिनिधितारर्तु सूर्यसंख्यानाम् ।
मेलनतः पीठानि ज्ञेयान्येतेषु पञ्चपञ्चाशत् ॥४४॥

यावन्मातृकं इत्यव्ययीभावः । यावन्तो मातृकाः तावन्ति पीठानी-

त्यर्थः । आदीनां नक्षत्रयोगिनीराशीनां । शशी एकं । निधयो नव । ताराः सप्तविंशतिः । ऋतवः षट् । सूर्याः द्वादश ॥ ४४ ॥

अथ चक्रराजस्य विद्याक्षरजन्यत्वमुपपादयति द्वाभ्यां श्लोकाभ्यां ।

कत्रितयादीकारात् बिन्दुर्जातस्तदग्निमेचक्रे ।
हृल्लेखाभिस्तत्परचक्रत्रितयं हकाराभ्याम् ॥ ४५ ॥

एकारेणच तत्परचक्रे जाते सकाराभ्याम् ।
चतुरश्राणिलकारैरेवं विद्याक्षरेण चक्रजनिः ॥४६॥

एतात्रितयाभिन्न स्वगुरुस्तदभेदभावनादार्ढ्यात् ।
तेन गणेशादिमयस्तद्वययाच स्वयं तथारूपः॥४७॥

एतेषां देवता विद्याचक्राणां त्रितयेनाऽभिन्नः । तेन गणेशादि षड्रूपः श्रीगुरुः । तत्प्रसादेन स्वयं साधकोपि ॥ ४७ ॥

इत्थं मातृाविद्या चक्रं स्वगुरुस्स्वयञ्चेति ।
पञ्चानामपि भेदाभावोमन्त्रस्य कौलिकार्थोयम् ४८

अथ क्रमप्राप्तं सर्व रहस्यार्थमाह ।

द्वादशषोडशदशभिस्तपनशशिदहनकलाभिरा-

कीर्णैः । पञ्चाशद्भिर्वर्णैरभिन्न देहा कुलीन कुण्डलिनी ॥ ४९ ॥

बिसतन्वी तटिदाभा मूलाधारस्थ पद्मशृङ्गाटात् ।
भित्वामूलहृदाज्ञगत वह्निरवीन्दुमण्डल त्रितयम् ॥

सूर्यस्य कलाः तपिन्यादयः द्वादश । ककारादिभिर्द्वादशाभिरानुलोम्येन भकारादिभिः प्रातिलोम्येन द्वादशाभिश्च युक्ताः । चंद्रकलाः षोडशामृतादयः षोडशस्वरैर्युक्ताः । अग्निकलादश धुर्मार्चिरादयः मयकारादि दश वर्णैर्युक्ताः । एवं पञ्चाशद्भि रक्षरै रभिन्ना कुलकुण्डलिनी । मूलाधारस्थपद्माशृङ्गाटात् । मूलाधारस्य कर्णिकायां विद्यमानात् शृङ्गाटात् त्रिकोणा दुपरिसार्धत्रिवलयाकारेण अधोमुखीसमुपविष्टा योगमर्यादया योगिभि रूर्ध्वमुखतयोत्थाप्यते । सामूलाधारानाहताज्ञाचक्र विद्यमानानि वह्निसूर्य सोममण्डलानि भिनत्ति ॥ ५० ॥

*सा व्योम्नि चिच्छरीरक मण्डलमध्ये ऽकुलेन सङ्गम्य ।
उभयाङ्गसङ्गजन्यं प्रवाहयन्ती सुधापूरम् ॥ ५१ ॥

---

*व्योमनि चिच्छशिमण्डल मध्येत्वकुलेन । इति पाठभेदः ।

"द्वादशान्तं ललाटोर्ध्वं कपालोर्ध्वावसानकं। द्व्यङ्गुलोर्द्धं शिरो-देशं परं व्योम प्रकीर्तितं" इत्युक्तलक्षणे व्योम्नि विद्यमानस्य चिच्छन्द्रमण्डलस्याधोमुखसहस्रारकर्णिकारूपस्य मध्येस्थितया अकुलकुण्डलिन्या सङ्गम्य ततोऽमृतपूरं स्रावयित्वा डाकिन्यादि मण्डलान्याप्लावयन्ती ॥ ५१ ॥

स्वयमपि तत्पानवशात् मत्ता भूत्वा पुनश्च तेनैव।
(सुषुम्ना) मार्गेणपरावृत्य स्वस्मिन्‌स्थाने सुखं स्वपिति।

सर्वमेतद्योगिनां अनुभवगम्यं। योगशास्त्रमर्यादा ज्ञानमात्र-वतान्तु परोक्षज्ञानगोचरो गुरुमुखादेव विविच्य बोद्धव्यमिति नेह विविच्यते ॥ ५२ ॥

साक्षाद्विद्यैवैषानततो भिन्ना (शिवा) जगन्माता।
अस्यास्स्वाभिन्नत्वं श्रीविद्याया रहस्यार्थः ॥५३॥

कुण्डलिन्यामातुर्विद्यायाः स्वस्यचाऽभेद इति रहस्यरूपो प्रका-श्योर्थ इत्यर्थः ॥ ५३ ॥

अथ महातत्वार्थमाह।

वागिन्द्रियैरगम्ये तत्वातीते महत्तरेऽणुतरे।
व्योम्नोप्युपरि स्थितिमति विश्वाभिन्ने चिदानन्दे ॥५४॥

ब्रह्मणि परे नियोज्य स्वात्मा तदभेदसंप्राप्त्यै ।
एषमहातत्वार्थः श्रीविद्यायाः शिवेनोक्तः ॥ ५५ ॥

अथ नामार्थ शब्दरूपार्थांवाह ।

तत्तद्वर्णार्थेयं तत्तद्वर्ण स्वरूपेयं ।
इतितु श्रीविद्यायाः नामार्थः शब्दरूपार्थः ॥५६॥

तत्तद्वर्णपदेन ककारादयो अष्टपञ्चाशत् वर्णागृह्यन्ते । नामार्थः त्रिविधः । अष्टपञ्चाशन्नामकः सप्तत्रिंशन्नामकः पञ्चदशनामकश्चेति ५६

अथ नामैकदेशार्थमाह ।

कल्याण्येकाक्षर्यावीशित्रीचापि ललिताच ।
इत्थंनामत्रिशती वाच्योर्थः तत्तदक्षरस्यऽपि
॥५७॥ तिथिमितबिन्दुगणोत्तरगजरसगिरिदस्रनाम सङ्ख्याकाः । अर्थां भवन्ति योगात्
नाम्नो नामैकदेशस्य ॥ ५८ ॥

नाम्नो नामार्थेषु त्रितीयपक्षस्य एकस्य नामैकदेशार्थस्य एकोनविंशति विधस्यच योगात् उक्तरीत्या गणनात् तिथिभिः पञ्चदश सङ्ख्यामितः यो विन्दुगणः तस्योत्तरा ये गजादयः ।

गजाः अष्टौ। रसाः षट्। गिरयः सप्त। दस्रौ द्वौ। नामानि त्रयः। अङ्कानां वामतो गतिरिति न्यायात् आदौ पञ्चदश विन्दुन् विलिख्य तद्वामे गजादीन् विलिखेत्। (वामपाठ) गतौ वामभागस्यैवोत्तरत्वात्। एवञ्च शतत्रयोत्तर सप्तविंशति सङ्ख्याक परार्धानि। षण्मध्यानि। अष्टावंत्यानिच त्रिशत्युक्तार्थ भेदा भवन्ति अङ्कतोपि॥ ३२,७६८,०००,०००,०००,०००,०००, ॥ एतदङ्कज्ञानप्रकारस्तु चरमाङ्कमारभ्य पूर्वं पूर्वाङ्कदशगुणिता उत्तरोत्तराङ्का इति परिभाषया। तन्नियमाश्च लीलावत्यां। "एकदश शतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्दं खर्व निखर्व महापद्म शङ्कवस्तस्मात्॥ जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञाः" इतिः॥ ५८॥

अथ शाक्तार्थों द्विविधः। अवयवार्थः शक्तिसमूहार्थश्चेति। अवयवार्थो नाम देव्या अवयवानां वर्णनं। तदाह।

वाक्काम शक्तिकूटैरवयवशो विग्रहो मातुः।
प्रतिपाद्योत्राकण्ठादामध्यादाच पादाग्रात्॥५९॥

शक्तिसमूहार्थमाह।

वेधोभारत्यौ माधवलक्ष्म्यौ रुद्रपार्वत्यौ।
रेफान्त वर्ण षट्कस्याऽर्थान् क्रमशो विजानीयात्॥६०॥

ता एतास्सकला अपि कामकलाएव नततोन्याः ।
सामानाधिकरण्यादीकारेणायमर्थोस्य ॥ ६१ ॥

एता ब्रह्मादयः षट् ॥ ६१ ॥

अयमेव कूटयोरपि परयोरर्थः परंतुतार्तीये ।
द्वैतीयीक द्वैतोयीक हकारस्सकारतः पूर्वः ॥ ६२ ॥

अन्वयितव्योक्षरशश्शक्तेश्शक्तैः विभाव्यत्वात् ।
वामेच्छादिक शक्तिमयत्वोक्तेरेष शाक्तार्थः ॥ ६३ ॥

द्वितीयकूटे मध्यम हकारः परं त्रितीयकूटस्य प्रथमभागेऽन्वययोग्यः । तस्य तत्र चतुर्थत्वेपि सजातीययोर्मध्ये द्वितीयत्वात्तथोक्तिः। तेनतयोरपि कूटयोः प्रातिस्विकं रेफान्तावर्णाः षडेवसंपद्यन्त इति॥६३॥

सामरस्यार्थमाह ।

कहयोर्लसयोरर्थौ शिवशक्ती शुद्धयोरचोरशक्तिः ।
उभयोस्समरस भावो हृल्लेखायाः परं ब्रह्म ॥ ६४ ॥

ब्रह्मैव शिवश्शक्तिश्चेति प्रत्येक कूटार्थः ।
शिवशक्तिसामरस्याद्विद्याया एष सामरस्यार्थः ॥६५॥

शिवश्शक्तिश्चेत्येतदुभयं ब्रह्मैवेति प्रतिकूटमर्थः। तदुक्तं "कत्रयं हृद्यश्चैवशैवोभागः प्रकीर्तितः। शक्त्यक्षराणि शेषाणि ह्रीङ्कार उभयात्मक" इति॥ ६५॥

अथ समस्तार्थमाह।

कनदीप्ताविति धातोः प्रकाशकत्वं ककारार्थः।
अध्ययनार्थकतेङ् स्यादेकारस्तदीयकरणार्थः ॥६६॥
वर्णद्वयमेलनतः प्रकाशिकाबुद्धिरित्यर्थः।
ईव्याप्ताविति धातोस्तस्या व्याप्तिस्त्रितीयवर्णार्थः ॥६७
तस्या लहर्याधिक्यं तन्निर्माणं मकारार्थः।
हन हिंसायामिति वै शौर्यं प्रत्यर्थि हननकरणत्वात् ६८
संभोगसाधनं धनमुपभोगार्थात् स्यतेः सुनोतेर्वा।
कमु कान्ताविति धातोरिच्छा विषयोङ्गनादिः कम् ॥६९
एषां गमनं प्रापण मोहाङ्गत्यर्थ धातुजन्यं हम्।
तस्यातिशयो लहरी तत्र श्लिष्टस्सवर्ण दीर्घेण ॥७०॥
ईकारस्तस्यार्थः कीर्तिस्सर्वासु दिक्षु दीप्तत्वात्।
ईव्यादीप्ताविति धातोर्निर्मितिरनयोर्मकारार्थः ॥७१॥

वाग्भव कूटस्यार्थः सूक्ष्ममति व्यापनाधिक्यम् ।
शौर्यधनस्त्री (श्री) यशसामाधिक्यं कामराजार्थः॥७२॥

एते सम्यक्कलयति सकला हरतेर्हकारस्स्यात् ।
निखिलजगत्संहर्त्रीत्यर्थस्तस्यापि वर्णस्य ॥ ७३ ॥

ईकारः प्रश्लिष्टस्सृष्टिस्थितिरूपदीप्तिकर्त्र्यर्थः ।
यद्वाहृदि खेदहरे प्रकाशते तेन माताह्रीः ॥ ७४ ॥

सकलान्तेन पदेन ह्रीकारे कर्मधारयः कार्यः ।
तस्य विशेष्योमस्यान्नादार्थस्संविदर्थोवा ॥ ७५ ॥

बुद्धिशौर्य धनस्त्री यशसामाधिक्यकर्तृ निखिलजगत्सृष्ट्यादि कर्तृ दहराकाशवर्ति नादरूपं चिद्रूपं ब्रह्मेति मन्त्रार्थः सिद्धः ॥७४॥

धातोर्बह्वर्थत्वात् बहुलग्रहणात् पृषोदरादित्वात् ।
आकृति गणपाठेनस्वेच्छानुगुणादुणादिकल्पनतः॥७६॥

छन्दसि सर्वविधीनां वैकल्पिकतावशादमुष्य मनोः ।
सिद्धैः कथितेर्थेस्मिन्वैयाकरणानुशासनानुमतिः॥७७॥

बहुतरसमासयोगात्समस्तपुरुषार्थ साधनत्वोक्तेः।
संक्षेपात्सारोक्तेः श्रीविद्यायाः समस्तार्थः ॥ ७८ ॥

अथ सगुणार्थमाह।

केविधिरेकारो हरिरकार ईशस्तत्रार्थमीडपदम्।
द्विस्वरमध्यगतस्य डकारस्य लकार आदेशः ॥ ७९॥

तेन ऋग्वेदात्मत्वं सूचितमाद्यस्य कूटस्य।
क्रमशोऽग्रिमकूटयुगे तेन यजुस्सामतासिद्धा ॥ ८० ॥

ह्रीमिति नामविशेष्यं नपुंसकं ब्रह्मलक्षकत्वेन।
विधिहरिगिरिशैरीड्यं ब्रह्मेति प्रथम कूटार्थः ॥ ८१ ॥

एकारोत्तरं पूर्वेणाकारः प्रश्लिष्यते। सच शिववाचकः ॥ ८१ ॥

हसकन्तु हसद्वदनं मतं ककारस्य वदनवाचित्वात्।
यद्वाहस आनन्दः कस्सूर्यो हस्तु चन्द्रस्स्यात् ॥८२॥

एतौलौ नयने यस्यैतत्कहलं रवीन्दुनेत्रमिति।
तेन प्रकाशकत्वात् चिद्रूपत्वं च निगदितं भवति॥८३॥

विधि हरि गिरिशेडयत्वे हेतू एते हसत्वकहलत्वे ।
तेनात्यमितानन्दं चिद्ब्रह्मेति द्वितीयकूटार्थः ॥८४॥

यतो ह्रीं हसकहलं ततो ह्रीं क ए ई लमित्यन्वयः॥ ८४ ॥

सकल कलाभिस्सहितं सकलं ब्रह्मतु त्रितीयकूटार्थः ।
इत्थं गुणगण कथनात् विद्याया एष सगुणार्थः॥८५॥

अत्र सर्वत्र सुलोपः ॥ ८५ ॥

महावाक्यार्थमाह ।

विधिहरिशिववचना अपि ककार एकार कोकारः ।
सृष्टिस्थितिभङ्गात्मक तत्तत्(कृत्य)जनकत्व लाक्षणिकाः ॥ ८६ ॥

ईश्वर वाचीकारो वक्तिडकारस्सदाशिवं ताभ्याम् ।
लक्षणया तत्र तिरोधानानुगहक कृत्यता गदिता॥८७॥

एतेन "यतोवा इमानी ",त्यादि श्रुत्युक्तं ब्रह्मणः तटस्थलक्षणमुक्तं भवति । ८७ ॥

स्वरूपलक्षणं द्वितीय कूटेनाह ।

हसआनन्दः सत्यं कं हमनन्तञ्च लं ज्ञानं ।

इत्थंब्रह्मतटस्थ स्वरूप लक्षणयुगेननिर्णीय (निष्कृष्टम्)

तदभेदं जीवगणे वक्ति तृतीयेन कूटेन ।

जाग्रत्सप्न सुषुप्त्याख्य कलात्रितयेन साहित्यात् ॥८९॥

सकलपदं जीवपरं ब्रह्मपरं शक्तिबीजं स्यात् ।

सामानाधिकरण्यात्तल्लक्षितशुद्धयोरभेदार्थः॥ ९०॥

अत्यल्पमिदं कथितं यत्सर्वं खल्विदं ब्रह्म ।

इत्येवं बोधयितुं सकलपदं वा त्रितीयकूटगतम् ९१ ॥

एवमवान्तर वाक्यैर्जीव ब्रह्मस्वरूपमभिधाय ।

तदभेदो वर्णित इत्येष महापूर्व वाक्यार्थः ॥ ९२ ॥

तत्वमसीति महावाक्ये तत्पदार्थत्वं पदार्थयोरेकविभक्तिमत्व सामानाधिकरण्यादभेदो बोध्यते । सच वाच्यार्थयोरसंभवा- ज्जहदजहल्लक्षणया लक्ष्यपदार्थयोरिति स्थितिः । तत्र तत्पदस्य वाच्यार्थः सृष्ट्यादि पञ्चक करः । लक्ष्यार्थस्तु कृत्यातीतं निर्विशेषं ब्रह्म । एवं त्वं पदस्य वाच्यार्थो जाग्रदाद्यवस्था पञ्चक विशिष्टः ।

लक्ष्यार्थस्तु अवस्थाद्यतीतं ब्रह्म । "यतोवा इमानि" "सत्यं ज्ञानं" "यथास्मिन्नाकाशे श्येनोवा सुपर्णोवा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायंपुरुषः" "नद्रष्टेर्द्रष्टारंपश्येः" (बृ.उ.९-४२.)

इत्यादिभिः अवान्तरवाक्यैः वाच्यार्थलक्ष्यार्थयोः निर्णये सति महावाक्ये लक्ष्यार्थयोरभेदबोधः । यद्यपि श्रुतिषु कृत्यत्रयमवस्थात्रयमेव वर्ण्यते तथापि तन्त्रानुसारात् तत्पञ्चकोपलक्षणत्वेन व्याख्येयं । त्रिवृत्करणस्य पञ्चीकरण परत्वमिव । एवंच प्रकृते त्रितीयकूटस्थ सकलपदेन कलाभिरवस्थाभिस्सहित इत्यर्थकेन वाच्यार्थस्योक्तावपि लक्ष्यार्थानुक्तेर्न्यूनता । तदर्थंच कूट द्वयमेवावृत्या त्वं पदस्य वाच्यलक्ष्यार्थयोस्संमर्पकत्वेन व्याख्येयं । अथवा तान्त्रिकाणां मते वाच्यार्थयोरप्यत्यन्ताभेदस्य शांभवानन्दकल्पलताकारादिभिः उपपादनात् कूटद्वयेन सृष्टिकर्तृत्वादि विशिष्टस्य अवस्थादि विशिष्टस्यैव वाच्यार्थस्य समर्पणं । त्रितीयकूटेतु तयोरभेदो जगतो वा संपूर्णस्याभेदो बोध्यते

इह यावान् व्यक्तव्योंशः तावतः सर्वस्याप्युक्तौ वेदान्तशास्त्रस्यैव कृत्स्नस्यारंभणीयतापत्योपरम्यते ॥ ९३ ॥

शक्त्या लक्षणयावा ये येऽर्था दर्शिता मनोरस्य ।
तेषु न कोपि विवादो प्रत्यक्षेणैव सिद्धत्वात् ॥ ९३ ॥

मनोर्मन्त्रस्य। प्रत्यक्षेणेति। शक्तिग्राहकव्याकरणकोशादेः शक्यसंबन्धस्यच स्फुटप्रदर्शनादिति भावः॥ ९२॥

ये पुनरिह भावार्थादयः षडर्था मनोरुक्ताः।
तेषु यदि शक्तिभक्तो नहि संभवतः तदपि का हानिः९४
आस्तामन्यावृत्तिर्विलक्षणा तत्र ग्रहस्तु मनोः।
शिववचनेन भविष्यति यद्वैषा शक्तिरेवास्तु॥ ९५॥
एतस्मादयमर्थो बोद्धव्य इतीश्वरेच्छात्वात्।
प्रतिपदमर्थविशेषाज्ञानेप्यास्तामखण्डवाक्यस्य॥९६॥
अर्थोप्यखण्डरूपो विशिष्टमतिरिक्तमितिहि सिद्धान्तः।
आसेचनकव्याहृत्यादिपदवदास्तां पदत्वमपि॥ ९७॥
एकस्यानेकार्था दृष्टा हरिसैन्धवादिषु पदेषु।
अन्यतमैकात्नगतौ प्रकरणतात्पर्ययोर्विशेषकता॥ ९८॥
प्रकृतेतु सर्वबोधस्येष्टत्वं नो विशेषकाकांक्षा।
अथवासकलार्थेषूपिशक्त्यैक्यं पुष्पवन्तपदवदिह॥९९॥
यत्र प्रतिपदमर्थास्तान् प्रत्यस्यास्तु वाक्यत्वम्।
क्वचनावान्तरवाक्यं समासवाक्यं महावाक्यम्॥१००॥

एकस्यानेकार्थे विनियोगादर्थबाहुल्यम् ।
वेदे बहुशः स्वीकृतमन्त्रत्वेकत्रविनियोगात् ॥ १०१ ॥

अखिलार्थबोधनियमो नियमाद्दृष्टं प्रकल्पयति ।
सिद्धप्रमाणदार्ढ्ये सकलं कल्प्यंहि तदविरोधाय ॥ १०२

*विद्यावर्णेयत्नोद्धारः कालस्तदुच्चारः ।
उत्पत्तिस्थानं तद्यतो रूपं स्थितिस्थानम् ॥ १०३ ॥

आकारः स्वंरूपं विभाव्यमर्थोऽन्तरङ्गाणि ।
ऋषयच्छंदोदैवतविनियोगौ बीजशक्तिकीलानि ॥ १०४

न्यासोध्यानं नियमः पूजादीनिबहिरङ्गानि ।
बाह्यान्यङ्गानि पुनः प्रायो लोके प्रसिद्धकल्पानि ॥ १०५ ॥

दुर्लभमान्तरमङ्गं प्रायोन्तर्मुखजनैस्तदादृत्यम् ।
तोषायैषा तेषामतः प्रदिष्टा रहस्यवरिवस्या ॥ १०६ ॥

---

*यागस्य स्वर्गं प्रति संसिद्धे हेतु हेतुमद्भावे । तदनुपपत्तिं निरसितुमलौकिकापूर्वमपि क्लृप्तम् ।–This is found added in another Ms. *Ed.*

एतामुत्सृज्य जडैः क्रियमाणा बाह्याडंबरोपास्तिः।
प्राणविहीनासुतनुर्विगलितसूत्रेवपुत्तलिका ॥ १०७ ॥

बीजान्मूलं मूलात् क्षेत्रस्यान्तस्थबाह्यविस्तारौ।
यद्यप्यनयोस्साम्यं प्राधान्यमथापि चान्तरङ्गस्य॥ १०८॥

सद्गुरुकुलतः कृपया लब्धा कामानि यं सूते।
निजबुद्धिमात्रजन्या पापं कन्या यथा स्वीया ॥१०९॥

कन्यापक्षे सद्गुरुः श्वशुरः ॥ १०९ ॥

अकथासनं हलक्षान्तरं समासाद्य मामकं ज्ञानम्।
मामकमेवानन्दं मह्यंददतो जयंति गुरुचरणाः॥११०॥

गुरुचरणैकसहायो भास्कररायो जगन्मातुः।
वरिवस्यातिरहस्यं वीरनमस्यं प्रजग्रन्थ ॥ १११ ॥

इति श्रीमत् पदवाक्यप्रमाण पारावार पारीण धुरीण सर्वतन्त्र स्वतन्त्र श्रीनृसिंहानन्दनाथ चरणारविन्दमिलिन्देन श्रीमद्गंभीरराय भारतीदीक्षितात्मजेन भास्कररायाऽपरनाम्ना भासुरानन्दनाथेन प्रणीतं सव्याख्यं वरिवस्यारहस्यं संपूर्णम् ॥

वस्तु प्रस्तुतमस्तु निस्तुलमहः स्तोमास्तिता वास्तनो
हस्त न्यस्त समस्त पुस्तकभर ध्वस्ता सदेनस्तति ।
शस्त स्वस्तिकृदस्त दुस्तर तमस्वस्तोकसौवस्तिकं
गीस्तोयस्तनयित्नु सुस्तनयुगं वास्तोष्पति प्रस्तुतम् ॥

ललितायास्त्रिभिर्वर्णैस्सकलार्थोऽभिधीयते ।
शेषेण देवीरूपेण तेनस्यादिदमीरितम् ॥

॥ शुभमस्तु ॥

PRINTED AT THE TATVA-VIVECHAKA PRESS, BOMBAY.

शुद्धपत्रिका.

पत्रे	पंक्तिः	अशुद्धं	शुद्धं
१	२	नरनृ	नर (नृ)
२	१६	धीर	धीरे
१२	१६	काले	कालो
१५	९	रवच्छं	स्वच्छं
१६	१३	शल्ल	शळ
१६	१८	त्यागीन	त्यागेन
१९	५	ह्रीयते	ह्रियते
२६	१२	विषुवत	विषुवत्
३२	४	नाना	नाना°
३७	१३	सम मष्टिं	समष्टि
३७	१५	स्तिस्व	स्तिस्र
३८	१०	तिस्वो	तिस्रो
३९	१	काना	कानां
३९	२०	कुट	कूट
४२	१८	त्वाम्म	त्वान्म
४८	९	मित्या	मिरित्या
४८	१८	घानं	घनं
४८	१९	तयोर	तयो